असृज्यत तस्मात् तस्मा दसृज्यता सृज्यत तस्मात् पादौ पादौ तस्मा दसृज्यता सृज्यत तस्मात् पादौ ।

(27)[P6] 7.1.1.6(25)– तस्मात् । पादौ । उप ।

तस्मात् पादौ पादौ तस्मात् तस्मात् पादा वुपोप पादौ तस्मात् तस्मात् पादा वुप ।

(28)[P6] 7.1.1.6(26)– पादौ । उप । जीवतः ।

पादा वुपोप पादौ पादा वुप जीवतो जीवत उप पादौ पादा वुप जीवतः ।

(29)[P6] 7.1.1.6(27)– उप । जीवतः । पत्तः ।

उप जीवतो जीवत उपोप जीवतः पत्तः पत्तो जीवत उपोप जीवतः पत्तः ।

(30)[P6] 7.1.1.6(28)– जीवतः । पत्तः । हि ।

जीवतः पत्तः पत्तो जीवतो जीवतः पत्तो हि हि पत्तो जीवतो जीवतः पत्तो हि ।

(31)[P6] 7.1.1.6(29)– पत्तः । हि । असृज्येताम् ।

पत्तो हि हि पत्तः पत्तो ह्यसृज्येता मसृज्येता(ग्म्) हि पत्तः पत्तो ह्यसृज्येताम् ।

(32)[P6] 7.1.1.6(30)– हि । असृज्येताम् । प्राणाः ।

ह्यसृज्येता मसृज्येता(ग्म्) हि ह्यसृज्येताम् प्राणाः प्राणा असृज्येता(ग्म्) हि ह्यसृज्येताम् प्राणाः ।

(33)[P6] 7.1.1.6(31)– असृज्येताम् । प्राणाः । वै ।

असृज्येताम् प्राणाः प्राणा असृज्येता मसृज्येताम् प्राणा वै वै प्राणा असृज्येता मसृज्येताम् प्राणा वै ।

(34)[P6] 7.1.1.6(32)– प्राणाः । वै । त्रिवृत् ।

प्राणा वै वै प्राणाः प्राणा वै त्रिवृत् त्रिवृद् वै प्राणाः प्राणा वै त्रिवृत् ।

(35)[P6] 7.1.1.6(32)– प्राणाः ।

प्राणा इति प्र – अनाः ।

(36)[P6] 7.1.1.6(33)– वै । त्रिवृत् । अर्द्धमासाः ।

वै त्रिवृत् त्रिवृद् वै वै त्रिवृ दर्द्धमासा अर्द्धमासा स्त्रिवृद् वै वै त्रिवृ दर्द्धमासाः ।

(37)[P6] 7.1.1.6(34)– त्रिवृत् । अर्द्धमासाः । पञ्चदशः ।

त्रिवृ दर्द्धमासा अर्द्धमासा स्त्रिवृत् त्रिवृ दर्द्धमासाः पञ्चदशः पञ्चदशो ऽर्द्धमासा स्त्रिवृत् त्रिवृ दर्द्धमासाः पञ्चदशः ।

(38)[P6] 7.1.1.6(34)– त्रिवृत् ।

त्रिवृदिति त्रि – वृत् ।

(39)[P6] 7.1.1.6(35)– अर्द्धमासाः । पञ्चदशः । प्रजापतिः ।

अर्द्धमासाः पञ्चदशः पञ्चदशो ऽर्द्धमासा अर्द्धमासाः पञ्चदशः प्रजापतिः प्रजापतिः पञ्चदशो ऽर्द्धमासा अर्द्धमासाः पञ्चदशः प्रजापतिः ।

(40)[P6] 7.1.1.6(35)– अर्द्धमासाः ।

अर्द्धमासा इत्यर्द्ध – मासाः ।

(41)[P6] 7.1.1.6(36)– पञ्चदशः । प्रजापतिः । सप्तदशः ।

पञ्चदशः प्रजापतिः प्रजापतिः पञ्चदशः पञ्चदशः प्रजापतिः सप्तदशः सप्तदशः प्रजापतिः पञ्चदशः पञ्चदशः प्रजापतिः सप्तदशः ।

(42)[P6] 7.1.1.6(36)– पञ्चदशः ।

पञ्चदश इति पञ्च – दशः ।

(43)[P6] 7.1.1.6(37)– प्रजापतिः । सप्तदशः । त्रयः ।

प्रजापतिः सप्तदशः सप्तदशः प्रजापतिः प्रजापतिः सप्तदश स्त्रय स्त्रयः सप्तदशः प्रजापतिः प्रजापतिः सप्तदश स्त्रयः ।

(44)[P6] 7.1.1.6(37)– प्रजापतिः ।

प्रजापतिरिति प्रजा – पतिः ।

(45)[P6] 7.1.1.6(38)– सप्तदशः । त्रयः । इमे ।

सप्तदश स्त्रय स्त्रयः सप्तदशः सप्तदश स्त्रय इम इमे त्रयः सप्तदशः सप्तदश स्त्रय इमे ।

(46)[P6] 7.1.1.6(38)– सप्तदशः ।

सप्तदश इति सप्त – दशः ।

(47)[P6] 7.1.1.6(39)– त्रयः । इमे । लोकाः ।

त्रय इम इमे त्रय स्त्रय इमे लोका लोका इमे त्रय स्त्रय इमे लोकाः ।

(48)[P6] 7.1.1.6(40)– इमे । लोकाः । असौ ।

इमे लोका लोका इम इमे लोका असा वसौ लोका इम इमे लोका असौ ।

(49)[P6] 7.1.1.6(41)– लोकाः । असौ । आदित्यः ।

लोका असा वसौ लोका लोका असा वादित्य आदित्यो ऽसौ लोका लोका असा वादित्यः ।

(50)[P6] 7.1.1.6(42)– असौ । आदित्यः । एकवि(ग्म्)शः ।

असा वादित्य आदित्यो ऽसा वसा वादित्य एकवि(ग्म्)श एकवि(ग्म्)श आदित्यो ऽसा वसा वादित्य एकवि(ग्म्)शः ।

(51)[P6] 7.1.1.6(43)– आदित्यः । एकवि(ग्म्)शः । एतस्मिन्न् ।

आदित्य एकवि(ग्म्)श एकवि(ग्म्)श आदित्य आदित्य एकवि(ग्म्)श एतस्मिन् नेतस्मिन् नेकवि(ग्म्)श आदित्य आदित्य एकवि(ग्म्)श एतस्मिन्न् ।

(52)[P6] 7.1.1.6(44)– एकवि(ग्म्)शः । एतस्मिन्न् । वै ।

एकवि(ग्म्)श एतस्मिन् नेतस्मिन् नेकवि(ग्म्)श एकवि(ग्म्)श एतस्मिन्. वै वा एतस्मिन् नेकवि(ग्म्)श एकवि(ग्म्)श एतस्मिन्. वै ।

(53)[P6] 7.1.1.6(44)– एकवि(ग्म्)शः ।

एकवि(ग्म्)श इत्येक – वि(ग्म्)शः ।

(54)[P6] 7.1.1.6(45)– एतस्मिन्न् । वै । एते ।

एतस्मिन्. वै वा एतस्मिन् नेतस्मिन्. वा एत एते वा एतस्मिन् नेतस्मिन्. वा एते ।

(55)[P6] 7.1.1.6(46)– वै । एते । श्रिताः ।

वा एत एते वै वा एते श्रिताः श्रिता एते वै वा एते श्रिताः ।

(56)[P6] 7.1.1.6(47)– एते । श्रिताः । एतस्मिन्न् ।

एते श्रिताः श्रिता एत एते श्रिता एतस्मिन् नेतस्मिञ् छ्रिता एत एते श्रिता एतस्मिन्न् ।

(57)[P6] 7.1.1.6(48)– श्रिताः । एतस्मिन्न् । प्रतिष्ठिताः ।

श्रिता एतस्मिन् नेतस्मिञ् छ्रिताः श्रिता एतस्मिन् प्रतिष्ठिताः प्रतिष्ठिता एतस्मिञ् छ्रिताः श्रिता एतस्मिन् प्रतिष्ठिताः ।

(58)[P6] 7.1.1.6(49)– एतस्मिन्न् । प्रतिष्ठिताः । यः ।

एतस्मिन् प्रतिष्ठिताः प्रतिष्ठिता एतस्मिन् नेतस्मिन् प्रतिष्ठिता यो यः प्रतिष्ठिता एतस्मिन् नेतस्मिन् प्रतिष्ठिता यः ।

(59)[P6] 7.1.1.6(50)– प्रतिष्ठिताः । यः । एवम् ।

प्रतिष्ठिता यो यः प्रतिष्ठिताः प्रतिष्ठिता य एव मेवं ँयः प्रतिष्ठिताः प्रतिष्ठिता य एवम् ।

(60)[P6] 7.1.1.6(50)– प्रतिष्ठिताः ।

प्रतिष्ठिता इति प्रति – स्थिताः ।

(61)[P6] 7.1.1.6(51)– यः । एवम् । वेद ।

य एव मेवं ँयो य एवं ँवेद वेदैवं ँयो य एवं ँवेद ।

(62)[P6] 7.1.1.6(52)- एवम् । वेद । एतस्मिन्न् ।

एवं ँवेद वेदैव मेवं ँवेदैतस्मिन् नेतस्मिन्. वेदैव मेवं ँवेदैतस्मिन्न् ।

(63)[P6] 7.1.1.6(53)- वेद । एतस्मिन्न् । एव ।

वेदैतस्मिन् नेतस्मिन्. वेद वेदैतस्मिन् नेवैवै तस्मिन्. वेद वेदैतस्मिन् नेव ।

(64)[P6] 7.1.1.6(54)- एतस्मिन्न् । एव । श्रयते ।

एतस्मिन् नेवैवै तस्मिन् नेतस्मिन् नेव श्रयते श्रयत एवैतस्मिन् नेतस्मिन् नेव श्रयते ।

(65)[P6] 7.1.1.6(55)- एव । श्रयते । एतस्मिन्न् ।

एव श्रयते श्रयत एवैव श्रयत एतस्मिन् नेतस्मिञ् छ्रयत एवैव श्रयत एतस्मिन्न् ।

(66)[P6] 7.1.1.6(56)- श्रयते । एतस्मिन्न् । प्रति ।

श्रयत एतस्मिन् नेतस्मिञ् छ्रयते श्रयत एतस्मिन् प्रति प्रत्येतस्मिञ् छ्रयते श्रयत एतस्मिन् प्रति ।

(67)[P6] 7.1.1.6(57)- एतस्मिन्न् । प्रति । तिष्ठति ॥

एतस्मिन् प्रति प्रत्येतस्मिन् नेतस्मिन् प्रति तिष्ठति तिष्ठति प्रत्येतस्मिन् नेतस्मिन् प्रति तिष्ठति ।

(68)[P6] 7.1.1.6(58)- प्रति । तिष्ठति ॥

प्रति तिष्ठति तिष्ठति प्रति प्रति तिष्ठति ।

(69)[P6] 7.1.1.6(59)- तिष्ठति ॥

तिष्ठतीति तिष्ठति ।

========

## 7.1.2 अनुवाकम् 2 – घनम्

(1)[P7] 7.1.2.1(1)– प्रातस्सवने । वै । गायत्रेण ।

प्रातस्सवने वै वै प्रातस्सवने प्रातस्सवने वै गायत्रेण गायत्रेण वै प्रातस्सवने प्रातस्सवने वै गायत्रेण ।

(2)[P7] 7.1.2.1(1)– प्रातस्सवने ।

प्रातस्सवन इति प्रातः – सवने ।

(3)[P7] 7.1.2.1(2)– वै । गायत्रेण । छन्दसा ।

वै गायत्रेण गायत्रेण वै वै गायत्रेण छन्दसा छन्दसा गायत्रेण वै वै गायत्रेण छन्दसा ।

(4)[P7] 7.1.2.1(3)– गायत्रेण । छन्दसा । त्रिवृते ।

गायत्रेण छन्दसा छन्दसा गायत्रेण गायत्रेण छन्दसा त्रिवृते त्रिवृते छन्दसा गायत्रेण गायत्रेण छन्दसा त्रिवृते ।

(5)[P7] 7.1.2.1(4)– छन्दसा । त्रिवृते । स्तोमाय ।

छन्दसा त्रिवृते त्रिवृते छन्दसा छन्दसा त्रिवृते स्तोमाय स्तोमाय त्रिवृते छन्दसा छन्दसा त्रिवृते स्तोमाय ।

(6)[P7] 7.1.2.1(5)– त्रिवृते । स्तोमाय । ज्योतिः । (GS–7.1–08)

त्रिवृते स्तोमाय स्तोमाय त्रिवृते त्रिवृते स्तोमाय ज्योतिर् ज्योतिः स्तोमाय त्रिवृते त्रिवृते स्तोमाय ज्योतिः ।

(7)[P7] 7.1.2.1(5)– त्रिवृते । (GS–7.1–08)

त्रिवृत इति त्रि – वृते ।

(8)[P7] 7.1.2.1(6)– स्तोमाय । ज्योतिः । दधत् । (GS–7.1–08)

स्तोमाय ज्योतिर् ज्योतिः स्तोमाय स्तोमाय ज्योतिर् दधद् दधज् ज्योतिः स्तोमाय स्तोमाय ज्योतिर् दधत् ।

(9)[P7] 7.1.2.1(7)– ज्योतिः । दधत् । एति । (GS–7.1–08)

ज्योतिर् दधद् दधज् ज्योतिर् ज्योतिर् दध देत्येति दधज् ज्योतिर् ज्योतिर् दध देति ।

(10)[P7] 7.1.2.1(8)– दधत् । एति । त्रिवृता । (GS–7.1–08)

दध देत्येति दधद् दध देति त्रिवृता त्रिवृ तैति दधद् दध देति त्रिवृता ।

(11)[P7] 7.1.2.1(9)– एति । त्रिवृता । ब्रह्मवर्चसेन ।

एति त्रिवृता त्रिवृ तैत्येति त्रिवृता ब्रह्मवर्चसेन ब्रह्मवर्चसेन त्रिवृ तैत्येति त्रिवृता ब्रह्मवर्चसेन ।

(12)[P7] 7.1.2.1(10)– त्रिवृता । ब्रह्मवर्चसेन । पञ्चदशाय ।

त्रिवृता ब्रह्मवर्चसेन ब्रह्मवर्चसेन त्रिवृता त्रिवृता ब्रह्मवर्चसेन पञ्चदशाय पञ्चदशाय ब्रह्मवर्चसेन त्रिवृता त्रिवृता ब्रह्मवर्चसेन पञ्चदशाय ।

(13)[P7] 7.1.2.1(10)– त्रिवृता ।

त्रिवृतेति त्रि – वृता ।

(14)[P7] 7.1.2.1(11)– ब्रह्मवर्चसेन । पञ्चदशाय । ज्योतिः ।

ब्रह्मवर्चसेन पञ्चदशाय पञ्चदशाय ब्रह्मवर्चसेन ब्रह्मवर्चसेन पञ्चदशाय ज्योतिर् ज्योतिः पञ्चदशाय ब्रह्मवर्चसेन ब्रह्मवर्चसेन पञ्चदशाय ज्योतिः ।

(15)[P7] 7.1.2.1(11)– ब्रह्मवर्चसेन ।

ब्रह्मवर्चसेनेति ब्रह्म – वर्चसेन ।

(16)[P7] 7.1.2.1(12)- पञ्चदशाय । ज्योतिः । दधत् ।

पञ्चदशाय ज्योतिर् ज्योतिः पञ्चदशाय पञ्चदशाय ज्योतिर् दधद् दधज् ज्योतिः पञ्चदशाय पञ्चदशाय ज्योतिर् दधत् ।

(17)[P7] 7.1.2.1(12)- पञ्चदशाय ।

पञ्चदशायेति पञ्च - दशाय ।

(18)[P7] 7.1.2.1(13)- ज्योतिः । दधत् । एति ।

ज्योतिर् दधद् दधज् ज्योतिर् ज्योतिर् दध देत्येति दधज् ज्योतिर् ज्योतिर् दध देति ।

(19)[P7] 7.1.2.1(14)- दधत् । एति । पञ्चदशेन ।

दध देत्येति दधद् दध देति पञ्चदशेन पञ्चदशे नैति दधद् दध देति पञ्चदशेन ।

(20)[P7] 7.1.2.1(15)- एति । पञ्चदशेन । ओजसा ।

एति पञ्चदशेन पञ्चदशे नैत्येति पञ्चदशे नौज सौजसा पञ्चदशे नैत्येति पञ्चदशे नौजसा ।

(21)[P7] 7.1.2.1(16)- पञ्चदशेन । ओजसा । वीर्येण ।

पञ्चदशे नौज सौजसा पञ्चदशेन पञ्चदशे नौजसा वीर्येण वीर्ये णौजसा पञ्चदशेन पञ्चदशे नौजसा वीर्येण ।

(22)[P7] 7.1.2.1(16)- पञ्चदशेन ।

पञ्चदशेनेति पञ्च - दशेन ।

(23)[P7] 7.1.2.1(17)- ओजसा । वीर्येण । सप्तदशाय ।

ओजसा वीर्येण वीर्ये णौज सौजसा वीर्येण सप्तदशाय सप्तदशाय वीर्ये णौज सौजसा वीर्येण सप्तदशाय ।

(24)[P7] 7.1.2.1(18)- वीर्येण । सप्तदशाय । ज्योतिः ।

वीर्येण सप्तदशाय सप्तदशाय वीर्येण वीर्येण सप्तदशाय ज्योतिर् ज्योतिः सप्तदशाय वीर्येण वीर्येण सप्तदशाय ज्योतिः ।

(25)[P7] 7.1.2.1(19)- सप्तदशाय । ज्योतिः । दधत् ।

सप्तदशाय ज्योतिर् ज्योतिः सप्तदशाय सप्तदशाय ज्योतिर् दधद् दधज् ज्योतिः सप्तदशाय सप्तदशाय ज्योतिर् दधत् ।

(26)[P7] 7.1.2.1(19)- सप्तदशाय ।

सप्तदशायेति सप्त - दशाय ।

(27)[P7] 7.1.2.1(20)- ज्योतिः । दधत् । एति ।

ज्योतिर् दधद् दधज् ज्योतिर् ज्योतिर् दध देत्येति दधज् ज्योतिर् ज्योतिर् दध देति ।

(28)[P7] 7.1.2.1(21)- दधत् । एति । सप्तदशेन ।

दध देत्येति दधद् दध देति सप्तदशेन सप्तदशे नैति दधद् दध देति सप्तदशेन ।

(29)[P7] 7.1.2.1(22)- एति । सप्तदशेन । प्राजापत्येन ।

एति सप्तदशेन सप्तदशे नैत्येति सप्तदशेन प्राजापत्येन प्राजापत्येन सप्तदशे नैत्येति सप्तदशेन प्राजापत्येन ।

(30)[P7] 7.1.2.1(23)- सप्तदशेन । प्राजापत्येन । प्रजननेन ।

सप्तदशेन प्राजापत्येन प्राजापत्येन सप्तदशेन सप्तदशेन प्राजापत्येन प्रजननेन प्रजननेन प्राजापत्येन सप्तदशेन सप्तदशेन प्राजापत्येन प्रजननेन ।

(31)[P7] 7.1.2.1(23)- सप्तदशेन ।

सप्तदशेनेति सप्त - दशेन ।

(32)[P7] 7.1.2.1(24)- प्राजापत्येन । प्रजननेन । एकवि(ग्म्)शाय ।

प्राजापत्येन प्रजननेन प्रजननेन प्राजापत्येन प्राजापत्येन प्रजनने नैकवि(ग्म्)शा

यैकवि(ग्म्)शाय प्रजननेन प्राजापत्येन प्राजापत्येन प्रजनने नैकवि(ग्म्)शाय ।

(33)[P7] 7.1.2.1(24)- प्राजापत्येन ।

प्राजापत्येनेति प्राजा - पत्येन ।

(34)[P7] 7.1.2.1(25)- प्रजननेन । एकवि(ग्म्)शाय । ज्योतिः ।

प्रजनने नैकवि(ग्म्)शा यैकवि(ग्म्)शाय प्रजननेन प्रजनने नैकवि(ग्म्)शाय ज्योतिर् ज्योति

रेकवि(ग्म्)शाय प्रजननेन प्रजनने नैकवि(ग्म्)शाय ज्योतिः ।

(35)[P7] 7.1.2.1(25)- प्रजननेन ।

प्रजननेनेति प्र - जननेन ।

(36)[P7] 7.1.2.1(26)- एकवि(ग्म्)शाय । ज्योतिः । दधत् ।

एकवि(ग्म्)शाय ज्योतिर् ज्योति रेकवि(ग्म्)शा यैकवि(ग्म्)शाय ज्योतिर् दधद् दधज् ज्योति

रेकवि(ग्म्)शा

यैकवि(ग्म्)शाय ज्योतिर् दधत् ।

(37)[P7] 7.1.2.1(26)- एकवि(ग्म्)शाय ।

एकवि(ग्म्)शायेत्येक - वि(ग्म्)शाय ।

(38)[P7] 7.1.2.1(27)- ज्योतिः । दधत् । एति ।

ज्योतिर् दधद् दधज् ज्योतिर् ज्योतिर् दध देत्येति दधज् ज्योतिर् ज्योतिर् दध देति ।

(39)[P7] 7.1.2.1(28)- दधत् । एति । स्तोमः ।

दध देत्येति दधद् दध देति स्तोमः स्तोम एति दधद् दध देति स्तोमः ।

(40)[P7] 7.1.2.1(29)– एति । स्तोमः । एव ।

एति स्तोमः स्तोम एत्येति स्तोम एवैव स्तोम एत्येति स्तोम एव ।

(41)[P7] 7.1.2.1(30)– स्तोमः । एव । तत् ।

स्तोम एवैव स्तोमः स्तोम एव तत् तदेव स्तोमः स्तोम एव तत् ।

(42)[P7] 7.1.2.1(31)– एव । तत् । स्तोमाय ।

एव तत् तदे वैव तथ् स्तोमाय स्तोमाय तदे वैव तथ् स्तोमाय ।

(43)[P7] 7.1.2.1(32)– तत् । स्तोमाय । ज्योतिः ।

तथ् स्तोमाय स्तोमाय तत् तथ् स्तोमाय ज्योतिर् ज्योतिः स्तोमाय तत् तथ् स्तोमाय ज्योतिः ।

(44)[P7] 7.1.2.1(33)– स्तोमाय । ज्योतिः । दधत् ।

स्तोमाय ज्योतिर् ज्योतिः स्तोमाय स्तोमाय ज्योतिर् दधद् दधज् ज्योतिः स्तोमाय स्तोमाय ज्योतिर् दधत् ।

(45)[P7] 7.1.2.1(34)– ज्योतिः । दधत् । एति ।

ज्योतिर् दधद् दधज् ज्योतिर् ज्योतिर् दध देत्येति दधज् ज्योतिर् ज्योतिर् दध देति ।

(46)[P7] 7.1.2.1(35)– दधत् । एति । अथो ।

दध देत्येति दधद् दध देत्यथो अथो एति दधद् दध देत्यथो ।

(47)[P7] 7.1.2.1(36)– एति । अथो । स्तोमे ।

एत्यथो अथो एत्ये त्यथो स्तोमे स्तोमे ऽथो एत्ये त्यथो स्तोमे ।

(48)[P7] 7.1.2.1(37)– अथो । स्तोमे । एव ।

अथो स्तोमे स्तोमे ऽथो अथो स्तोम एवैव स्तोमे ऽथो अथो स्तोम एव ।

(49)[P7] 7.1.2.1(37)- अथो᳚ ।

अथो॒ इत्यथो᳚ ।

(50)[P7] 7.1.2.1(38)- स्तोमे᳚ । ए॒व । स्तोम᳚म् ।

स्तोम॑ ए॒वैव स्तोमे॒ स्तोम॑ ए॒व स्तोम॒(ग्ग्॒) स्तोम॑ मे॒व स्तोमे॒ स्तोम॑ ए॒व स्तोम᳚म् ।

(51)[P7] 7.1.2.1(39)- ए॒व । स्तोम᳚म् । अ॒भि ।

ए॒व स्तोम॒(ग्ग्॒) स्तोम॑ मे॒वैव स्तोम॑ म॒भ्य॑भि स्तोम॑ मे॒वैव स्तोम॑ म॒भि ।

(52)[P7] 7.1.2.1(40)- स्तोम᳚म् । अ॒भि । प्र ।

स्तोम॑ म॒भ्य॑भि स्तोम॒(ग्ग्॒) स्तोम॑ म॒भि प्र प्राभि स्तोम॒(ग्ग्॒) स्तोम॑ म॒भि प्र ।

(53)[P7] 7.1.2.1(41)- अ॒भि । प्र । न॒य॒ति॒ ।

अ॒भि प्र प्राभ्य॑भि प्र ण॑यति नय॒ति प्राभ्य॑भि प्र ण॑यति ।

(54)[P7] 7.1.2.1(42)- प्र । न॒य॒ति॒ । याव॑न्तः ।

प्र ण॑यति नय॒ति प्र प्र ण॑यति॒ याव॑न्तो॒ याव॑न्तो नय॒ति प्र प्र ण॑यति॒ याव॑न्तः ।

(55)[P7] 7.1.2.1(43)- न॒य॒ति॒ । याव॑न्तः । वै ।

न॒य॒ति॒ याव॑न्तो॒ याव॑न्तो नयति नय॒ति याव॑न्तो॒ वै वै याव॑न्तो नयति नय॒ति याव॑न्तो॒ वै ।

(56)[P7] 7.1.2.1(44)- याव॑न्तः । वै । स्तोमा᳚ः ।

याव॑न्तो॒ वै वै याव॑न्तो॒ याव॑न्तो॒ वै स्तोमा॒ः स्तोमा॒ वै याव॑न्तो॒ याव॑न्तो॒ वै स्तोमा᳚ः ।

(57)[P7] 7.1.2.1(45)- वै । स्तोमा᳚ः । ताव॑न्तः ।

वै स्तोमा॒ः स्तोमा॒ वै वै स्तोमा॒ स्ताव॑न्त॒ स्ताव॑न्त॒ः स्तोमा॒ वै वै स्तोमा॒ स्ताव॑न्तः ।

(58)[P7] 7.1.2.1(46)- स्तोमा᳚ः । ताव॑न्तः । कामा᳚ः ।

स्तोमा॒ स्ताव॑न्त॒ स्ताव॑न्त॒ः स्तोमा॒ः स्तोमा॒ स्ताव॑न्त॒ः कामा॒ः कामा॒ स्ताव॑न्त॒ः स्तोमा॒ः स्तोमा॒ स्ताव॑न्त॒ः कामा᳚ः ।

(59)[P7] 7.1.2.1(47)– तावन्तः । कामाः । तावन्तः ।

तावन्तः कामाः कामा स्तावन्त स्तावन्तः कामा स्तावन्त स्तावन्तः कामा स्तावन्त स्तावन्तः कामा स्तावन्तः ।

(60)[P7] 7.1.2.1(48)– कामाः । तावन्तः । लोकाः ।

कामा स्तावन्त स्तावन्तः कामाः कामा स्तावन्तो लोका लोका स्तावन्तः कामाः कामा स्तावन्तो लोकाः ।

(61)[P7] 7.1.2.1(49)– तावन्तः । लोकाः । तावन्ति ।

तावन्तो लोका लोका स्तावन्त स्तावन्तो लोका स्तावन्ति तावन्ति लोका स्तावन्त स्तावन्तो लोका स्तावन्ति ।

(62)[P7] 7.1.2.1(50)– लोकाः । तावन्ति । ज्योती(ग्म्)षि ।

लोका स्तावन्ति तावन्ति लोका लोका स्तावन्ति ज्योती(ग्म्)षि ज्योती(ग्म्)षि तावन्ति लोका लोका स्तावन्ति ज्योती(ग्म्)षि ।

(63)[P7] 7.1.2.1(51)– तावन्ति । ज्योती(ग्म्)षि । एतावतः ।

तावन्ति ज्योती(ग्म्)षि ज्योती(ग्म्)षि तावन्ति तावन्ति ज्योती(ग्ग्) ष्येतावत एतावतो ज्योती(ग्म्)षि तावन्ति तावन्ति ज्योती(ग्ग्) ष्येतावतः ।

(64)[P7] 7.1.2.1(52)– ज्योती(ग्म्)षि । एतावतः । एव ।

ज्योती(ग्ग्) ष्येतावत एतावतो ज्योती(ग्म्)षि ज्योती(ग्ग्) ष्येतावत एवैवैतावतो ज्योती(ग्म्)षि ज्योती(ग्ग्) ष्येतावत एव ।

(65)[P7] 7.1.2.1(53)– एतावतः । एव । स्तोमान् ।

एतावत एवै वैतावत एतावत एव स्तोमान् थ्स्तोमा नेवैतावत एतावत एव स्तोमान् ।

(66)[P7] 7.1.2.1(54)– एव । स्तोमान् । एतावतः ।

एव स्तोमान् थ्स्तोमा नेवैव स्तोमा नेतावत एतावतः स्तोमा नेवैव स्तोमा नेतावतः ।

(67)[P7] 7.1.2.1(55)– स्तोमान् । एतावतः । कामान् ।

स्तोमा नेतावत एतावतः स्तोमान् थ्स्तोमा नेतावतः कामान् कामा नेतावतः स्तोमान् थ्स्तोमा नेतावतः कामान् ।

(68)[P7] 7.1.2.1(56)– एतावतः । कामान् । एतावतः ।

एतावतः कामान् कामा नेतावत एतावतः कामा नेतावत एतावतः कामा नेतावत एतावतः कामा नेतावतः ।

(69)[P7] 7.1.2.1(57)– कामान् । एतावतः । लोकान् ।

कामा नेतावत एतावतः कामान् कामा नेतावतो लोकान् ँलोका नेतावतः कामान् कामा नेतावतो लोकान् ।

(70)[P7] 7.1.2.1(58)– एतावतः । लोकान् । एतावन्ति ।

एतावतो लोकान् ँलोका नेतावत एतावतो लोका नेताव न्त्येतावन्ति लोका नेतावत एतावतो लोका नेतावन्ति ।

(71)[P7] 7.1.2.1(59)– लोकान् । एतावन्ति । ज्योती(ग्म्)षि ।

लोका नेताव न्त्येतावन्ति लोकान् ँलोका नेतावन्ति ज्योती(ग्म्)षि ज्योती(ग्ग्)ष्येतावन्ति लोकान् ँलोका नेतावन्ति ज्योती(ग्म्)षि ।

(72)[P7] 7.1.2.1(60)– एतावन्ति । ज्योती(ग्म्)षि । अव ।

एतावन्ति ज्योती(ग्म्)षि ज्योती(ग्ग्) ष्येताव न्त्येतावन्ति ज्योती(ग्ग्) ष्यवाव ज्योती(ग्ग्) ष्येताव न्त्येतावन्ति ज्योती(ग्ग्) ष्यव ।

(73)[P7] 7.1.2.1(61)– ज्योती(गम्)षि । अव । रुन्धे ॥

ज्योती(गग्) ष्यवाव ज्योती(गम्)षि ज्योती(गग्) ष्यव रुन्धे रुन्धे ऽव ज्योती(गम्)षि ज्योती(गग्)ष्यव रुन्धे ।

(74)[P7] 7.1.2.1(62)– अव । रुन्धे ॥

अव रुन्धे रुन्धे ऽवाव रुन्धे ।

(75)[P7] 7.1.2.1(63)– रुन्धे ॥

रुन्ध इति रुन्धे ।

======

## 7.1.3 अनुवाकम् 3 – घनम्

(1)[P8] 7.1.3.1(1)– ब्रह्मवादिनः । वदन्ति । सः ।

ब्रह्मवादिनो वदन्ति वदन्ति ब्रह्मवादिनो ब्रह्मवादिनो वदन्ति स स वदन्ति ब्रह्मवादिनो ब्रह्मवादिनो वदन्ति सः ।

(2)[P8] 7.1.3.1(1)– ब्रह्मवादिनः ।

ब्रह्मवादिन इति ब्रह्म – वादिनः ।

(3)[P8] 7.1.3.1(2)– वदन्ति । सः । तु ।

वदन्ति स स वदन्ति वदन्ति स तु तु स वदन्ति वदन्ति स तु ।

(4)[P8] 7.1.3.1(3)– सः । तु । वै । (PS–5.13,JM–27)

स तु तु स स त्वै वै तु स स त्वै ।

(5)[P8] 7.1.3.1(4)– तु । वै । यजेत । (PS–5.13,JM–27)

त्वै वै तु त्वै यजेत यजेत वै तु त्वै यजेत ।

(6)[P8] 7.1.3.1(5)– वै । यजेत । यः ।

वै यजेत यजेत वै वै यजेत यो यो यजेत वै वै यजेत यः ।

(7)[P8] 7.1.3.1(6)– यजेत । यः । अग्निष्टोमेन ।

यजेत यो यो यजेत यजेत यो ऽग्निष्टोमेना ग्निष्टोमेन यो यजेत यजेत यो ऽग्निष्टोमेन ।

(8)[P8] 7.1.3.1(7)– यः । अग्निष्टोमेन । यजमानः ।

यो ऽग्निष्टोमेना ग्निष्टोमेन यो यो ऽग्निष्टोमेन यजमानो यजमानो ऽग्निष्टोमेन यो यो ऽग्निष्टोमेन यजमानः ।

(9)[P8] 7.1.3.1(8)- अग्निष्टोमेन । यजमानः । अथ ।

अग्निष्टोमेन यजमानो यजमानो ऽग्निष्टोमेना ग्निष्टोमेन यजमानो ऽथाथ यजमानो ऽग्निष्टोमेना ग्निष्टोमेन यजमानो ऽथ ।

(10)[P8] 7.1.3.1(8)- अग्निष्टोमेन ।

अग्निष्टोमेनेत्यग्नि - स्तोमेन ।

(11)[P8] 7.1.3.1(9)- यजमानः । अथ । सर्वस्तोमेन ।

यजमानो ऽथाथ यजमानो यजमानो ऽथ सर्वस्तोमेन सर्वस्तोमे नाथ यजमानो यजमानो ऽथ सर्वस्तोमेन ।

(12)[P8] 7.1.3.1(10)- अथ । सर्वस्तोमेन । यजेत ।

अथ सर्वस्तोमेन सर्वस्तोमेना थाथ सर्वस्तोमेन यजेत यजेत सर्वस्तोमेना थाथ सर्वस्तोमेन यजेत ।

(13)[P8] 7.1.3.1(11)- सर्वस्तोमेन । यजेत । इति ।

सर्वस्तोमेन यजेत यजेत सर्वस्तोमेन सर्वस्तोमेन यजेतेतीति यजेत सर्वस्तोमेन सर्वस्तोमेन यजेतेति ।

(14)[P8] 7.1.3.1(11)- सर्वस्तोमेन ।

सर्वस्तोमेनेति सर्व - स्तोमेन ।

(15)[P8] 7.1.3.1(12)- यजेत । इति । यस्य ।

यजेतेतीति यजेत यजेतेति यस्य यस्येति यजेत यजेतेति यस्य ।

(16)[P8] 7.1.3.1(13)- इति । यस्य । त्रिवृतम् ।

इति यस्य यस्येतीति यस्य त्रिवृतम् त्रिवृतं ँयस्येतीति यस्य त्रिवृतम् ।

(17)[P8] 7.1.3.1(14)– यस्य । त्रिवृतम् । अन्तर्यन्ति ।

यस्य त्रिवृतम् त्रिवृतं ँयस्य यस्य त्रिवृत मन्तर्य न्त्यन्तर्यन्ति त्रिवृतं ँयस्य यस्य त्रिवृत मन्तर्यन्ति ।

(18)[P8] 7.1.3.1(15)– त्रिवृतम् । अन्तर्यन्ति । प्राणान् ।

त्रिवृत मन्तर्य न्त्यन्तर्यन्ति त्रिवृतम् त्रिवृत मन्तर्यन्ति प्राणान् प्राणा नन्तर्यन्ति त्रिवृतम् त्रिवृत मन्तर्यन्ति प्राणान् ।

(19)[P8] 7.1.3.1(15)– त्रिवृतम् ।

त्रिवृतमिति त्रि – वृतम् ।

(20)[P8] 7.1.3.1(16)– अन्तर्यन्ति । प्राणान् । तस्य ।

अन्तर्यन्ति प्राणान् प्राणा नन्तर्य न्त्यन्तर्यन्ति प्राणा(गग्) स्तस्य तस्य प्राणा नन्तर्य न्त्यन्तर्यन्ति प्राणा(गग्) स्तस्य ।

(21)[P8] 7.1.3.1(16)– अन्तर्यन्ति ।

अन्तर्यन्तीत्यन्तः – यन्ति ।

(22)[P8] 7.1.3.1(17)– प्राणान् । तस्य । अन्तः ।

प्राणा(गग्) स्तस्य तस्य प्राणान् प्राणा(गग्) स्तस्यान्त रन्त स्तस्य प्राणान् प्राणा(गग्) स्तस्यान्तः ।

(23)[P8] 7.1.3.1(17)– प्राणान् ।

प्राणानिति प्र – अनान् ।

(24)[P8] 7.1.3.1(18)– तस्य । अन्तः । यन्ति ।

तस्यान्त रन्त स्तस्य तस्यान्तर् यन्ति यन्त्यन्त स्तस्य तस्यान्तर् यन्ति ।

(25)[P8] 7.1.3.1(19)- अन्तः । यन्ति । प्राणेषु ।

अन्तर् यन्ति यन्त्यन्त रन्तर् यन्ति प्राणेषु प्राणेषु यन्त्यन्त रन्तर् यन्ति प्राणेषु ।

(26)[P8] 7.1.3.1(20)- यन्ति । प्राणेषु । मे ।

यन्ति प्राणेषु प्राणेषु यन्ति यन्ति प्राणेषु मे मे प्राणेषु यन्ति यन्ति प्राणेषु मे ।

(27)[P8] 7.1.3.1(21)- प्राणेषु । मे । अपि । (GS-7.1-09)

प्राणेषु मे मे प्राणेषु प्राणेषु मे ऽप्यपि मे प्राणेषु प्राणेषु मे ऽपि ।

(28)[P8] 7.1.3.1(21)- प्राणेषु । (GS-7.1-09)

प्राणेष्विति प्र - अनेषु ।

(29)[P8] 7.1.3.1(22)- मे । अपि । असत् । (GS-7.1-09)

मे ऽप्यपि मे मे ऽप्यस दस दपि मे मे ऽप्यसत् ।

(30)[P8] 7.1.3.1(23)- अपि । असत् । इति । (GS-7.1-09)

अप्यस दस दप्यप्य सदिती त्यस दप्यप्य सदिति ।

(31)[P8] 7.1.3.1(24)- असत् । इति । खलु । (GS-7.1-09)

अस दिती त्यसद सदिति खलु खल्वि त्यस दस दिति खलु ।

(32)[P8] 7.1.3.1(25)- इति । खलु । वै । (GS-7.1-09)

इति खलु खल्वितीति खलु वै वै खल्वितीति खलु वै ।

(33)[P8] 7.1.3.1(26)- खलु । वै । यज्ञेन । (GS-7.1-09)

खलु वै वै खलु खलु वै यज्ञेन यज्ञेन वै खलु खलु वै यज्ञेन ।

(34)[P8] 7.1.3.1(27)- वै । यज्ञेन । यजमानः । (GS-7.1-09)

वै यज्ञेन यज्ञेन वै वै यज्ञेन यजमानो यजमानो यज्ञेन वै वै यज्ञेन यजमानः ।

(35)[P8] 7.1.3.1(28)- यज्ञेन । यजमानः । यजते ।

यज्ञेन यजमानो यजमानो यज्ञेन यज्ञेन यजमानो यजते यजते यजमानो यज्ञेन यज्ञेन यजमानो यजते ।

(36)[P8] 7.1.3.1(29)- यजमानः । यजते । यस्य ।

यजमानो यजते यजते यजमानो यजमानो यजते यस्य यस्य यजते यजमानो यजमानो यजते यस्य ।

(37)[P8] 7.1.3.1(30)- यजते । यस्य । पञ्चदशम् ।

यजते यस्य यस्य यजते यजते यस्य पञ्चदशम् पञ्चदशं ँयस्य यजते यजते यस्य पञ्चदशम् ।

(38)[P8] 7.1.3.1(31)- यस्य । पञ्चदशम् । अन्तर्यन्ति ।

यस्य पञ्चदशम् पञ्चदशं ँयस्य यस्य पञ्चदश मन्तर्य न्त्यन्तर्यन्ति पञ्चदशं ँयस्य यस्य पञ्चदश मन्तर्यन्ति ।

(39)[P8] 7.1.3.1(32)- पञ्चदशम् । अन्तर्यन्ति । वीर्यम् ।

पञ्चदश मन्तर्य न्त्यन्तर्यन्ति पञ्चदशम् पञ्चदश मन्तर्यन्ति वीर्यं ँवीर्य मन्तर्यन्ति पञ्चदशम् पञ्चदश मन्तर्यन्ति वीर्यम् ।

(40)[P8] 7.1.3.1(32)- पञ्चदशम् ।

पञ्चदशमिति पञ्च - दशम् ।

(41)[P8] 7.1.3.1(33)- अन्तर्यन्ति । वीर्यम् । तस्य ।

अन्तर्यन्ति वीर्यं ँवीर्य मन्तर्य न्त्यन्तर्यन्ति वीर्यम् तस्य तस्य वीर्य मन्तर्य न्त्यन्तर्यन्ति वीर्यम् तस्य ।

(42)[P8] 7.1.3.1(33)– अन्तर्यन्ति ।

अन्तर्यन्तीत्यन्तः – यन्ति ।

(43)[P8] 7.1.3.1(34)– वीर्यम् । तस्य । अन्तः ।

वीर्यम् तस्य तस्य वीर्यं ँवीर्यम् तस्यान्त रन्त स्तस्य वीर्यं ँवीर्यम् तस्यान्तः ।

(44)[P8] 7.1.3.1(35)– तस्य । अन्तः । यन्ति ।

तस्यान्त रन्त स्तस्य तस्यान्तर् यन्ति यन्त्यन्त स्तस्य तस्यान्तर् यन्ति ।

(45)[P8] 7.1.3.1(36)– अन्तः । यन्ति । वीर्ये ।

अन्तर् यन्ति यन्त्यन्त रन्तर् यन्ति वीर्ये वीर्ये यन्त्यन्त रन्तर् यन्ति वीर्ये ।

(46)[P8] 7.1.3.1(37)– यन्ति । वीर्ये । मे ।

यन्ति वीर्ये वीर्ये यन्ति यन्ति वीर्ये मे मे वीर्ये यन्ति यन्ति वीर्ये मे ।

(47)[P8] 7.1.3.1(38)– वीर्ये । मे । अपि ।

वीर्ये मे मे वीर्ये वीर्ये मे ऽप्यपि मे वीर्ये वीर्ये मे ऽपि ।

(48)[P8] 7.1.3.1(39)– मे । अपि । असत् ।

मे ऽप्यपि मे मे ऽप्यस दस दपि मे मे ऽप्यसत् ।

(49)[P8] 7.1.3.1(40)– अपि । असत् । इति ।

अप्यस दस दप्यप्य सदिती त्यस दप्यप्य सदिति ।

(50)[P8] 7.1.3.1(41)– असत् । इति । खलु ।

अस दिती त्यसद सदिति खलु खल्वि त्यस दस दिति खलु ।

(51)[P8] 7.1.3.1(42)– इति । खलु । वै ।

इति खलु खल्वितीति खलु वै वै खल्वितीति खलु वै ।

(52)[P8] 7.1.3.1(43)- खलु । वै । यज्ञेन ।

खलु वै वै खलु खलु वै यज्ञेन यज्ञेन वै खलु खलु वै यज्ञेन ।

(53)[P8] 7.1.3.1(44)- वै । यज्ञेन । यजमानः ।

वै यज्ञेन यज्ञेन वै वै यज्ञेन यजमानो यजमानो यज्ञेन वै वै यज्ञेन यजमानः ।

(54)[P8] 7.1.3.1(45)- यज्ञेन । यजमानः । यजते ।

यज्ञेन यजमानो यजमानो यज्ञेन यज्ञेन यजमानो यजते यजते यजमानो यज्ञेन यज्ञेन यजमानो यजते ।

(55)[P8] 7.1.3.1(46)- यजमानः । यजते । यस्य ।

यजमानो यजते यजते यजमानो यजमानो यजते यस्य यस्य यजते यजमानो यजमानो यजते यस्य ।

(56)[P8] 7.1.3.1(47)- यजते । यस्य । सप्तदशम् ।

यजते यस्य यस्य यजते यजते यस्य सप्तदश(ग्म्) सप्तदशं ँयस्य यजते यजते यस्य सप्तदशम् ।

(57)[P8] 7.1.3.1(48)- यस्य । सप्तदशम् । अन्तर्यन्ति ।

यस्य सप्तदश(ग्म्) सप्तदशं ँयस्य यस्य सप्तदश मन्तर्य न्त्यन्तर्यन्ति सप्तदशं ँयस्य यस्य सप्तदश मन्तर्यन्ति ।

(58)[P8] 7.1.3.1(49)- सप्तदशम् । अन्तर्यन्ति । प्रजाम् ।

सप्तदश मन्तर्य न्त्यन्तर्यन्ति सप्तदश(ग्म्) सप्तदश मन्तर्यन्ति प्रजाम् प्रजा मन्तर्यन्ति सप्तदश(ग्म्) सप्तदश मन्तर्यन्ति प्रजाम् ।

(59)[P8] 7.1.3.1(49)- सप्तदशम् ।

सप्तदशमिति सप्त - दशम् ।

(60)[P8] 7.1.3.1(50)– अन्तर्यन्ति । प्रजाम् । तस्य ।

अन्तर्यन्ति प्रजाम् प्रजा मन्तर्य न्त्यन्तर्यन्ति प्रजाम् तस्य तस्य प्रजा मन्तर्य न्त्यन्तर्यन्ति प्रजाम् तस्य ।

(61)[P8] 7.1.3.1(50)– अन्तर्यन्ति ।

अन्तर्यन्तीत्यन्तः – यन्ति ।

(1)[P9] 7.1.3.2(1)– प्रजाम् । तस्य । अन्तः ।

प्रजाम् तस्य तस्य प्रजाम् प्रजाम् तस्यान्त रन्त स्तस्य प्रजाम् प्रजाम् तस्यान्तः ।

(2)[P9] 7.1.3.2(1)– प्रजाम् ।

प्रजामिति प्र – जाम् ।

(3)[P9] 7.1.3.2(2)– तस्य । अन्तः । यन्ति ।

तस्यान्त रन्त स्तस्य तस्यान्तर् यन्ति यन्त्यन्त स्तस्य तस्यान्तर् यन्ति ।

(4)[P9] 7.1.3.2(3)– अन्तः । यन्ति । प्रजायाम् ।

अन्तर् यन्ति यन्त्यन्त रन्तर् यन्ति प्रजायाम् प्रजायां ँयन्त्यन्त रन्तर् यन्ति प्रजायाम् ।

(5)[P9] 7.1.3.2(4)– यन्ति । प्रजायाम् । मे ।

यन्ति प्रजायाम् प्रजायां ँयन्ति यन्ति प्रजायाम् मे मे प्रजायां ँयन्ति यन्ति प्रजायाम् मे ।

(6)[P9] 7.1.3.2(5)– प्रजायाम् । मे । अपि ।

प्रजायाम् मे मे प्रजायाम् प्रजायाम् मे ऽप्यपि मे प्रजायाम् प्रजायाम् मे ऽपि ।

(7)[P9] 7.1.3.2(5)– प्रजायाम् ।

प्रजायामिति प्र – जायाम् ।

(8)[P9] 7.1.3.2(6)– मे । अपि । असत् ।

मे ऽप्यपि मे मे ऽप्यस दस दपि मे मे ऽप्यसत् ।

(9)[P9] 7.1.3.2(7)- अपि । असत् । इति ।

अप्यस दस दप्य प्यस दिती त्यस दप्य प्यसदिति ।

(10)[P9] 7.1.3.2(8)- असत् । इति । खलु ।

अस दिती त्यस दस दिति खलु खल्वि त्यस दस दिति खलु ।

(11)[P9] 7.1.3.2(9)- इति । खलु । वै ।

इति खलु खल्वितीति खलु वै वै खल्वितीति खलु वै ।

(12)[P9] 7.1.3.2(10)- खलु । वै । यज्ञेन ।

खलु वै वै खलु खलु वै यज्ञेन यज्ञेन वै खलु खलु वै यज्ञेन ।

(13)[P9] 7.1.3.2(11)- वै । यज्ञेन । यजमानः ।

वै यज्ञेन यज्ञेन वै वै यज्ञेन यजमानो यजमानो यज्ञेन वै वै यज्ञेन यजमानः ।

(14)[P9] 7.1.3.2(12)- यज्ञेन । यजमानः । यजते ।

यज्ञेन यजमानो यजमानो यज्ञेन यज्ञेन यजमानो यजते यजते यजमानो यज्ञेन यज्ञेन यजमानो यजते ।

(15)[P9] 7.1.3.2(13)- यजमानः । यजते । यस्य ।

यजमानो यजते यजते यजमानो यजमानो यजते यस्य यस्य यजते यजमानो यजमानो यजते यस्य ।

(16)[P9] 7.1.3.2(14)- यजते । यस्य । एकवि(ग्म्)शम् ।

यजते यस्य यस्य यजते यजते यस्यैकवि(ग्म्)श मेकवि(ग्म्)शं ँयस्य यजते यजते यस्यैकवि(ग्म्)शम् ।

(17)[P9] 7.1.3.2(15)– यस्य । एकवि(ग्म्)शम् । अन्तर्यन्ति ।

यस्यैकवि(ग्म्)श मेकवि(ग्म्)शं ँयस्य यस्यैकवि(ग्म्)श मन्तर्य न्त्यन्तर्य न्त्येकवि(ग्म्)शं ँयस्य यस्यैकवि(ग्म्)श मन्तर्यन्ति ।

(18)[P9] 7.1.3.2(16)– एकवि(ग्म्)शम् । अन्तर्यन्ति । प्रतिष्ठाम् ।

एकवि(ग्म्)श मन्तर्य न्त्यन्तर्य न्त्येकवि(ग्म्)श मेकवि(ग्म्)श मन्तर्यन्ति प्रतिष्ठाम् प्रतिष्ठा मन्तर्य न्त्येकवि(ग्म्)श मेकवि(ग्म्)श मन्तर्यन्ति प्रतिष्ठाम् ।

(19)[P9] 7.1.3.2(16)– एकवि(ग्म्)शम् ।

एकवि(ग्म्)शमित्येक – वि(ग्म्)शम् ।

(20)[P9] 7.1.3.2(17)– अन्तर्यन्ति । प्रतिष्ठाम् । तस्य ।

अन्तर्यन्ति प्रतिष्ठाम् प्रतिष्ठा मन्तर्य न्त्यन्तर्यन्ति प्रतिष्ठाम् तस्य तस्य प्रतिष्ठा मन्तर्य न्त्यन्तर्यन्ति प्रतिष्ठाम् तस्य ।

(21)[P9] 7.1.3.2(17)– अन्तर्यन्ति ।

अन्तर्यन्तीत्यन्तः – यन्ति ।

(22)[P9] 7.1.3.2(18)– प्रतिष्ठाम् । तस्य । अन्तः ।

प्रतिष्ठाम् तस्य तस्य प्रतिष्ठाम् प्रतिष्ठाम् तस्यान्त रन्त स्तस्य प्रतिष्ठाम् प्रतिष्ठाम् तस्यान्तः ।

(23)[P9] 7.1.3.2(18)– प्रतिष्ठाम् ।

प्रतिष्ठामिति प्रति – स्थाम् ।

(24)[P9] 7.1.3.2(19)– तस्य । अन्तः । यन्ति ।

तस्यान्त रन्त स्तस्य तस्यान्तर् यन्ति यन्त्यन्त स्तस्य तस्यान्तर् यन्ति ।

(25)[P9] 7.1.3.2(20)– अन्तः । यन्ति । प्रतिष्ठायाम् ।

अन्तर् यन्ति यन्त्यन्त रन्तर् यन्ति प्रतिष्ठायाम् प्रतिष्ठायां ँयन्त्यन्त रन्तर् यन्ति प्रतिष्ठायाम् ।

(26)[P9] 7.1.3.2(21)- यन्ति । प्रतिष्ठायाम् । मे ।

यन्ति प्रतिष्ठायाम् प्रतिष्ठायां ँयन्ति यन्ति प्रतिष्ठायाम् मे मे प्रतिष्ठायां ँयन्ति यन्ति प्रतिष्ठायाम् मे ।

(27)[P9] 7.1.3.2(22)- प्रतिष्ठायाम् । मे । अपि ।

प्रतिष्ठायाम् मे मे प्रतिष्ठायाम् प्रतिष्ठायाम् मे ऽप्यपि मे प्रतिष्ठायाम् प्रतिष्ठायाम् मे ऽपि ।

(28)[P9] 7.1.3.2(22)- प्रतिष्ठायाम् ।

प्रतिष्ठायामिति प्रति - स्थायाम् ।

(29)[P9] 7.1.3.2(23)- मे । अपि । असत् ।

मे ऽप्यपि मे मे ऽप्यस दस दपि मे मे ऽप्यसत् ।

(30)[P9] 7.1.3.2(24)- अपि । असत् । इति ।

अप्यस दस दप्य प्यसदि तीत्यस दप्य प्यस दिति ।

(31)[P9] 7.1.3.2(25)- असत् । इति । खलु ।

अस दिती त्यस दस दिति खलु खल्वि त्यस दस दिति खलु ।

(32)[P9] 7.1.3.2(26)- इति । खलु । वै ।

इति खलु खल्वितीति खलु वै वै खल्वितीति खलु वै ।

(33)[P9] 7.1.3.2(27)- खलु । वै । यज्ञेन ।

खलु वै वै खलु खलु वै यज्ञेन यज्ञेन वै खलु खलु वै यज्ञेन ।

(34)[P9] 7.1.3.2(28)- वै । यज्ञेन । यजमानः ।

वै यज्ञेन यज्ञेन वै वै यज्ञेन यजमानो यजमानो यज्ञेन वै वै यज्ञेन यजमानः ।

(35)[P9] 7.1.3.2(29)– यज्ञेन । यजमानः । यजते ।

यज्ञेन यजमानो यजमानो यज्ञेन यज्ञेन यजमानो यजते यजते यजमानो यज्ञेन यज्ञेन यजमानो यजते ।

(36)[P9] 7.1.3.2(30)– यजमानः । यजते । यस्य ।

यजमानो यजते यजते यजमानो यजमानो यजते यस्य यस्य यजते यजमानो यजमानो यजते यस्य ।

(37)[P9] 7.1.3.2(31)– यजते । यस्य । त्रिणवम् ।

यजते यस्य यस्य यजते यजते यस्य त्रिणवम् त्रिणवं ँयस्य यजते यजते यस्य त्रिणवम् ।

(38)[P9] 7.1.3.2(32)– यस्य । त्रिणवम् । अन्तर्यन्ति ।

यस्य त्रिणवम् त्रिणवं ँयस्य यस्य त्रिणव मन्तर्य न्त्यन्तर्यन्ति त्रिणवं ँयस्य यस्य त्रिणव मन्तर्यन्ति ।

(39)[P9] 7.1.3.2(33)– त्रिणवम् । अन्तर्यन्ति । ऋतून् ।

त्रिणव मन्तर्य न्त्यन्तर्यन्ति त्रिणवम् त्रिणव मन्तर्य न्त्यृतू नृतू नन्तर्यन्ति त्रिणवम् त्रिणव मन्तर्य न्त्यृतून् ।

(40)[P9] 7.1.3.2(33)– त्रिणवम् ।

त्रिणवमिति त्रि – नवम् ।

(41)[P9] 7.1.3.2(34)– अन्तर्यन्ति । ऋतून् । च ।

अन्तर्य न्त्यृतू नृतू नन्तर्य न्त्यन्तर्य न्त्यृतू(ग्ग्) श्च च र्तू नन्तर्य न्त्यन्तर्य न्त्यृतू(ग्ग्) श्च ।

(42)[P9] 7.1.3.2(34)– अन्तर्यन्ति ।

अन्तर्यन्तीत्यन्तः – यन्ति ।

(43)[P9] 7.1.3.2(35)- ऋतून् । च । तस्य ।

ऋतू(ग्ग्) श्च च र्तू नृतू(ग्ग्) श्च तस्य तस्य च र्तू नृतू(ग्ग्) श्च तस्य ।

(44)[P9] 7.1.3.2(36)- च । तस्य । नक्षत्रियाम् ।

च तस्य तस्य च च तस्य नक्षत्रियाम् नक्षत्रियाम् तस्य च च तस्य नक्षत्रियाम् ।

(45)[P9] 7.1.3.2(37)- तस्य । नक्षत्रियाम् । च ।

तस्य नक्षत्रियाम् नक्षत्रियाम् तस्य तस्य नक्षत्रियाम् च च नक्षत्रियाम् तस्य तस्य नक्षत्रियाम् च ।

(46)[P9] 7.1.3.2(38)- नक्षत्रियाम् । च । विराजम् ।

नक्षत्रियाम् च च नक्षत्रियाम् नक्षत्रियाम् च विराजं ँविराजम् च नक्षत्रियाम् नक्षत्रियाम् च विराजम् ।

(47)[P9] 7.1.3.2(39)- च । विराजम् । अन्तः ।

च विराजं ँविराजम् च च विराज मन्त रन्तर् विराजम् च च विराज मन्तः ।

(48)[P9] 7.1.3.2(40)- विराजम् । अन्तः । यन्ति ।

विराज मन्त रन्तर् विराजं ँविराज मन्तर् यन्ति यन्त्यन्तर् विराजं ँविराज मन्तर् यन्ति ।

(49)[P9] 7.1.3.2(40)- विराजम् ।

विराजमिति वि - राजम् ।

(50)[P9] 7.1.3.2(41)- अन्तः । यन्ति । ऋतुषु ।

अन्तर् यन्ति यन्त्यन्त रन्तर् यन्त्यृतु ष्वृतुषु यन्त्यन्त रन्तर् यन्त्यृतुषु ।

(51)[P9] 7.1.3.2(42)- यन्ति । ऋतुषु । मे ।

यन्त्यृतु ष्वृतुषु यन्ति यन्त्यृतुषु मे म ऋतुषु यन्ति यन्त्यृतुषु मे ।

(52)[P9] 7.1.3.2(43)– ऋ॒तुषु॑ । मे॒ । अपि॑ ।

ऋ॒तुषु॑ मे म ऋ॒तु ष्वृ॒तुषु॒ मे ऽप्यपि॑ म ऋ॒तु ष्वृ॒तुषु॒ मे ऽपि॑ ।

(53)[P9] 7.1.3.2(44)– मे॒ । अपि॑ । अ॒स॒त् ।

मे ऽप्यपि॑ मे॒ मे ऽप्य॑स दस॒ दपि॑ मे॒ मे ऽप्य॑सत् ।

(54)[P9] 7.1.3.2(45)– अपि॑ । अ॒स॒त् । न॒क्ष॒त्रिया॑याम् ।

अप्य॑स दस॒ दप्य प्य॑सन् नक्ष॒त्रिया॑याम् नक्ष॒त्रिया॑या मस॒ दप्य प्य॑सन् नक्ष॒त्रिया॑याम् ।

(55)[P9] 7.1.3.2(46)– अ॒स॒त् । न॒क्ष॒त्रिया॑याम् । च॒ ।

अ॒स॒न् न॒क्ष॒त्रिया॑याम् नक्ष॒त्रिया॑या मस दसन् नक्ष॒त्रिया॑याम् च च नक्ष॒त्रिया॑या मस दसन् नक्ष॒त्रिया॑याम् च ।

(56)[P9] 7.1.3.2(47)– न॒क्ष॒त्रिया॑याम् । च॒ । वि॒रा॑जि ।

न॒क्ष॒त्रिया॑याम् च च नक्ष॒त्रिया॑याम् नक्ष॒त्रिया॑याम् च वि॒रा॑जि वि॒रा॑जि च नक्ष॒त्रिया॑याम् नक्ष॒त्रिया॑याम् च वि॒रा॑जि ।

(57)[P9] 7.1.3.2(48)– च॒ । वि॒रा॑जि । इति॑ ।

च॒ वि॒रा॑जि वि॒रा॑जि च च वि॒राजीतीति॑ वि॒रा॑जि च च वि॒राजीति॑ ।

(58)[P9] 7.1.3.2(49)– वि॒रा॑जि । इति॑ । खलु॑ ।

वि॒राजीतीति॑ वि॒रा॑जि वि॒राजीति॒ खलु॒ खल्विति॑ वि॒रा॑जि वि॒राजीति॒ खलु॑ ।

(59)[P9] 7.1.3.2(49)– वि॒रा॑जि ।

वि॒राजीति॑ वि – राजि॑ ।

(60)[P9] 7.1.3.2(50)– इति॑ । खलु॑ । वै ।

इति॒ खलु॒ खल्वितीति॒ खलु॒ वै वै खल्वितीति॒ खलु॒ वै ।

(1)[P10] 7.1.3.3(1)- खलु । वै । यज्ञेन ।

खलु वै वै खलु खलु वै यज्ञेन यज्ञेन वै खलु खलु वै यज्ञेन ।

(2)[P10] 7.1.3.3(2)- वै । यज्ञेन । यजमानः ।

वै यज्ञेन यज्ञेन वै वै यज्ञेन यजमानो यजमानो यज्ञेन वै वै यज्ञेन यजमानः ।

(3)[P10] 7.1.3.3(3)- यज्ञेन । यजमानः । यजते ।

यज्ञेन यजमानो यजमानो यज्ञेन यज्ञेन यजमानो यजते यजते यजमानो यज्ञेन यज्ञेन यजमानो यजते ।

(4)[P10] 7.1.3.3(4)- यजमानः । यजते । यस्य ।

यजमानो यजते यजते यजमानो यजमानो यजते यस्य यस्य यजते यजमानो यजमानो यजते यस्य ।

(5)[P10] 7.1.3.3(5)- यजते । यस्य । त्रयस्त्रि(ग्म्)शम् ।

यजते यस्य यस्य यजते यजते यस्य त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)शं ँयस्य यजते यजते यस्य त्रयस्त्रि(ग्म्)शम् ।

(6)[P10] 7.1.3.3(6)- यस्य । त्रयस्त्रि(ग्म्)शम् । अन्तर्यन्ति ।

यस्य त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)शं ँयस्य यस्य त्रयस्त्रि(ग्म्)श मन्तर्य न्त्यन्तर्यन्ति त्रयस्त्रि(ग्म्)शं ँयस्य यस्य त्रयस्त्रि(ग्म्)श मन्तर्यन्ति ।

(7)[P10] 7.1.3.3(7)- त्रयस्त्रि(ग्म्)शम् । अन्तर्यन्ति । देवताः ।

त्रयस्त्रि(ग्म्)श मन्तर्य न्त्यन्तर्यन्ति त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)श मन्तर्यन्ति देवता देवता अन्तर्यन्ति त्रयस्त्रि(ग्म्)शम् त्रयस्त्रि(ग्म्)श मन्तर्यन्ति देवताः ।

(8)[P10] 7.1.3.3(7)- त्रयस्त्रि(ग्म्)शम् ।

त्रयस्त्रि(ग्म्)शमिति त्रयः - त्रि(ग्म्)शम् ।

(9)[P10] 7.1.3.3(8)- अन्तर्यन्ति । देवताः । तस्य ।

अन्तर्यन्ति देवता देवता अन्तर्य न्त्यन्तर्यन्ति देवता स्तस्य तस्य देवता अन्तर्य न्त्यन्तर्यन्ति देवता स्तस्य ।

(10)[P10] 7.1.3.3(8)- अन्तर्यन्ति ।

अन्तर्यन्तीत्यन्तः - यन्ति ।

(11)[P10] 7.1.3.3(9)- देवताः । तस्य । अन्तः ।

देवता स्तस्य तस्य देवता देवता स्तस्यान्त रन्त स्तस्य देवता देवता स्तस्यान्तः ।

(12)[P10] 7.1.3.3(10)- तस्य । अन्तः । यन्ति ।

तस्यान्त रन्त स्तस्य तस्यान्तर् यन्ति यन्त्यन्त स्तस्य तस्यान्तर् यन्ति ।

(13)[P10] 7.1.3.3(11)- अन्तः । यन्ति । देवतासु ।

अन्तर् यन्ति यन्त्यन्त रन्तर् यन्ति देवतासु देवतासु यन्त्यन्त रन्तर् यन्ति देवतासु ।

(14)[P10] 7.1.3.3(12)- यन्ति । देवतासु । मे ।

यन्ति देवतासु देवतासु यन्ति यन्ति देवतासु मे मे देवतासु यन्ति यन्ति देवतासु मे ।

(15)[P10] 7.1.3.3(13)- देवतासु । मे । अपि ।

देवतासु मे मे देवतासु देवतासु मे ऽप्यपि मे देवतासु देवतासु मे ऽपि ।

(16)[P10] 7.1.3.3(14)- मे । अपि । असत् ।

मे ऽप्यपि मे मे ऽप्यस दस दपि मे मे ऽप्यसत् ।

(17)[P10] 7.1.3.3(15)- अपि । असत् । इति ।

अप्यस दस दप्य प्यसदिती त्यस दप्य प्यस दिति ।

(18)[P10] 7.1.3.3(16)- असत् । इति । खलु ।

अस दिती त्यस दस दिति खलु खल्वि त्यस दस दिति खलु ।

(19)[P10] 7.1.3.3(17)– इति । खलु । वै ।

इति खलु खल्वितीति खलु वै वै खल्वितीति खलु वै ।

(20)[P10] 7.1.3.3(18)– खलु । वै । यज्ञेन ।

खलु वै वै खलु खलु वै यज्ञेन यज्ञेन वै खलु खलु वै यज्ञेन ।

(21)[P10] 7.1.3.3(19)– वै । यज्ञेन । यजमानः ।

वै यज्ञेन यज्ञेन वै वै यज्ञेन यजमानो यजमानो यज्ञेन वै वै यज्ञेन यजमानः ।

(22)[P10] 7.1.3.3(20)– यज्ञेन । यजमानः । यजते ।

यज्ञेन यजमानो यजमानो यज्ञेन यज्ञेन यजमानो यजते यजते यजमानो यज्ञेन यज्ञेन यजमानो यजते ।

(23)[P10] 7.1.3.3(21)– यजमानः । यजते । यः ।

यजमानो यजते यजते यजमानो यजमानो यजते यो यो यजते यजमानो यजमानो यजते यः ।

(24)[P10] 7.1.3.3(22)– यजते । यः । वै ।

यजते यो यो यजते यजते यो वै वै यो यजते यजते यो वै ।

(25)[P10] 7.1.3.3(23)– यः । वै । स्तोमानाम् ।

यो वै वै यो यो वै स्तोमाना(गग्) स्तोमानां ँवै यो यो वै स्तोमानाम् ।

(26)[P10] 7.1.3.3(24)– वै । स्तोमानाम् । अवमम् ।

वै स्तोमाना(गग्) स्तोमानां ँवै वै स्तोमाना मवम मवम(गग्) स्तोमानां ँवै वै स्तोमाना मवमम् ।

(27)[P10] 7.1.3.3(25)– स्तोमानाम् । अवमम् । परमताम् ।

स्तोमाना मवम मवम(गग्) स्तोमाना(गग्) स्तोमाना मवमम् परमताम् परमता मवम(गग्) स्तोमाना(गग्) स्तोमाना मवमम् परमताम् ।

(28)[P10] 7.1.3.3(26)– अवमम् । परमताम् । गच्छन्तम् ।

अवमम् परमताम् परमता मवम मवमम् परमताम् गच्छन्तम् गच्छन्तम् परमता मवम मवमम् परमताम् गच्छन्तम् ।

(29)[P10] 7.1.3.3(27)– परमताम् । गच्छन्तम् । वेद ।

परमताम् गच्छन्तम् गच्छन्तम् परमताम् परमताम् गच्छन्तं ँवेद वेद गच्छन्तम् परमताम् परमताम् गच्छन्तं ँवेद ।

(30)[P10] 7.1.3.3(28)– गच्छन्तम् । वेद । परमताम् ।

गच्छन्तं ँवेद वेद गच्छन्तम् गच्छन्तं ँवेद परमताम् परमतां ँवेद गच्छन्तम् गच्छन्तं ँवेद परमताम् ।

(31)[P10] 7.1.3.3(29)– वेद । परमताम् । एव ।

वेद परमताम् परमतां ँवेद वेद परमता मेवैव परमतां ँवेद वेद परमता मेव ।

(32)[P10] 7.1.3.3(30)– परमताम् । एव । गच्छति ।

परमता मेवैव परमताम् परमता मेव गच्छति गच्छ त्येव परमताम् परमता मेव गच्छति ।

(33)[P10] 7.1.3.3(31)– एव । गच्छति । त्रिवृत् ।

एव गच्छति गच्छ त्येवैव गच्छति त्रिवृत् त्रिवृद् गच्छ त्येवैव गच्छति त्रिवृत् ।

(34)[P10] 7.1.3.3(32)– गच्छति । त्रिवृत् । वै ।

गच्छति त्रिवृत् त्रिवृद् गच्छति गच्छति त्रिवृद् वै वै त्रिवृद् गच्छति गच्छति त्रिवृद् वै ।

(35)[P10] 7.1.3.3(33)– त्रिवृत् । वै । स्तोमानाम् ।

त्रिवृद् वै वै त्रिवृत् त्रिवृद् वै स्तोमाना(गग्) स्तोमानां ँवै त्रिवृत् त्रिवृद् वै स्तोमानाम् ।

(36)[P10] 7.1.3.3(33)– त्रिवृत् ।

त्रिवृदिति त्रि – वृत् ।

(37)[P10] 7.1.3.3(34)– वै । स्तोमानाम् । अवमः ।

वै स्तोमाना(गग्) स्तोमानां वै वै स्तोमाना मवमो ऽवमः स्तोमानां वै वै स्तोमाना मवमः ।

(38)[P10] 7.1.3.3(35)– स्तोमानाम् । अवमः । त्रिवृत् ।

स्तोमाना मवमो ऽवमः स्तोमाना(गग्) स्तोमाना मवम स्त्रिवृत् त्रिवृ दवमः स्तोमाना(गग्) स्तोमाना मवम स्त्रिवृत् ।

(39)[P10] 7.1.3.3(36)– अवमः । त्रिवृत् । परमः ।

अवम स्त्रिवृत् त्रिवृ दवमो ऽवम स्त्रिवृत् परमः परम स्त्रिवृ दवमो ऽवम स्त्रिवृत् परमः ।

(40)[P10] 7.1.3.3(37)– त्रिवृत् । परमः । यः ।

त्रिवृत् परमः परम स्त्रिवृत् त्रिवृत् परमो यो यः परम स्त्रिवृत् त्रिवृत् परमो यः ।

(41)[P10] 7.1.3.3(37)– त्रिवृत् ।

त्रिवृदिति त्रि – वृत् ।

(42)[P10] 7.1.3.3(38)– परमः । यः । एवम् ।

परमो यो यः परमः परमो य एव मेवं यः परमः परमो य एवम् ।

(43)[P10] 7.1.3.3(39)– यः । एवम् । वेद ।

य एव मेवं यो य एवं वेद वेदैवं यो य एवं वेद ।

(44)[P10] 7.1.3.3(40)– एवम् । वेद । परमताम् ।

एवं वेद वेदैव मेवं वेद परमताम् परमतां वेदैव मेवं वेद परमताम् ।

(45)[P10] 7.1.3.3(41)– वेद । परमताम् । एव ।

वेद परमताम् परमतां वेद वेद परमता मेवैव परमतां वेद वेद परमता मेव ।

(46)[P10] 7.1.3.3(42)– परमताम् । एव । गच्छति ॥

परमता मेवैव परमताम् परमता मेव गच्छति गच्छ त्येव परमताम् परमता मेव गच्छति ।

(47)[P10] 7.1.3.3(43)- एव । गच्छति ॥

एव गच्छति गच्छ त्येवैव गच्छति ।

(48)[P10] 7.1.3.3(44)- गच्छति ॥

गच्छतीति गच्छति ।

========

## 7.1.4अनुवाकम् 4 – घनम्

(1)[P11] 7.1.4.1(1)– अङ्गि॑रसः । वै । स॒त्रम् ।

अङ्गि॑रसो॒ वै वा अङ्गि॑र॒सो ऽङ्गि॑रसो॒ वै स॒त्र(ग्म्) स॒त्रं ँवा अङ्गि॑र॒सो ऽङ्गि॑रसो॒ वै स॒त्रम् ।

(2)[P11] 7.1.4.1(2)– वै । स॒त्रम् । आ॒स॒त॒ ।

वै स॒त्र(ग्म्) स॒त्रं ँवै वै स॒त्र मा॑सता सत स॒त्रं ँवै वै स॒त्र मा॑सत ।

(3)[P11] 7.1.4.1(3)– स॒त्रम् । आ॒स॒त॒ । ते ।

स॒त्र मा॑सता सत स॒त्र(ग्म्) स॒त्र मा॑स॒त ते त आ॑सत स॒त्र(ग्म्) स॒त्र मा॑स॒त ते ।

(4)[P11] 7.1.4.1(4)– आ॒स॒त॒ । ते । सु॒व॒र्गम् ।

आ॒स॒त॒ ते त आ॑सता स॒त ते सु॑व॒र्ग(ग्म्) सु॑व॒र्गम् त आ॑सता स॒त ते सु॑व॒र्गम् ।

(5)[P11] 7.1.4.1(5)– ते । सु॒व॒र्गम् । लो॒कम् ।

ते सु॑व॒र्ग(ग्म्) सु॑व॒र्गम् ते ते सु॑व॒र्गम् ँलो॒कम् ँलो॒क(ग्म्) सु॑व॒र्गम् ते ते सु॑व॒र्गम् ँलो॒कम् ।

(6)[P11] 7.1.4.1(6)– सु॒व॒र्गम् । लो॒कम् । आ॒य॒न्न् ।

सु॒व॒र्गम् ँलो॒कम् ँलो॒क(ग्म्) सु॑व॒र्ग(ग्म्) सु॑व॒र्गम् ँलो॒क मा॑यन् नायन् ँलो॒क(ग्म्) सु॑व॒र्ग(ग्म्) सु॑व॒र्गम् ँलो॒क मा॑यन्न् ।

(7)[P11] 7.1.4.1(6)– सु॒व॒र्गम् ।

सु॒व॒र्गमिति॑ सुवः – गम् ।

(8)[P11] 7.1.4.1(7)– लो॒कम् । आ॒य॒न्न् । ते॒षा᳚म् ।

लो॒क मा॑यन् नायन् ँलो॒कम् ँलो॒क मा॑य॒न् तेषाम् तेषा॑ मायन् ँलो॒कम् ँलो॒क मा॑य॒न् ते॒षा᳚म् ।

(9)[P11] 7.1.4.1(8)– आ॒य॒न्न् । ते॒षा᳚म् । ह॒विष्मा॑न् ।

आ॒य॒न् ते॒षा॒म् तेषा॑ मायन् नाय॒न् तेषा(ग्म्)॑ ह॒विष्मा॑न्. ह॒विष्मा॒न् तेषा॑ मायन् नाय॒न् तेषा(ग्म्)॑ ह॒विष्मा॑न् ।

(10)[P11] 7.1.4.1(9)– तेषाम् । हविष्मान् । च ।

तेषा(ग्म्) हविष्मान्. हविष्मान् तेषाम् तेषा(ग्म्) हविष्मा(ग्ग्) श्च च हविष्मान् तेषाम् तेषा(ग्म्) हविष्मा(ग्ग्) श्च ।

(11)[P11] 7.1.4.1(10)– हविष्मान् । च । हविष्कृत् ।

हविष्मा(ग्ग्) श्च च हविष्मान्. हविष्मा(ग्ग्) श्च हविष्कृ द्धविष्कृच् च हविष्मान्. हविष्मा(ग्ग्) श्च हविष्कृत् ।

(12)[P11] 7.1.4.1(11)– च । हविष्कृत् । च ।

च हविष्कृ द्धविष्कृच् च च हविष्कृच् च च हविष्कृच् च च हविष्कृच् च ।

(13)[P11] 7.1.4.1(12)– हविष्कृत् । च । अहीयेताम् ।

हविष्कृच् च च हविष्कृ द्धविष्कृच् चाहीयेता महीयेताम् च हविष्कृ द्धविष्कृच् चाहीयेताम् ।

(14)[P11] 7.1.4.1(12)– हविष्कृत् ।

हविष्कृदिति हविः – कृत् ।

(15)[P11] 7.1.4.1(13)– च । अहीयेताम् । तौ ।

चाहीयेता महीयेताम् च चाहीयेताम् तौ ता वहीयेताम् च चाहीयेताम् तौ ।

(16)[P11] 7.1.4.1(14)– अहीयेताम् । तौ । अकामयेताम् ।

अहीयेताम् तौ ता वहीयेता महीयेताम् ता वकामयेता मकामयेताम् ता वहीयेता महीयेताम् ता वकामयेताम् ।

(17)[P11] 7.1.4.1(15)– तौ । अकामयेताम् । सुवर्गम् ।

ता वकामयेता मकामयेताम् तौ ता वकामयेता(ग्म्) सुवर्ग(ग्म्) सुवर्ग मकामयेताम् तौ ता वकामयेता(ग्म्) सुवर्गम् ।

(18)[P11] 7.1.4.1(16)– अकामयेताम् । सुवर्गम् । लोकम् ।

अकामयेता(ग्म्) सुवर्ग(ग्म्) सुवर्ग मकामयेता मकामयेता(ग्म्) सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग मकामयेता मकामयेता(ग्म्) सुवर्गम् ँलोकम् ।

(19)[P11] 7.1.4.1(17)– सुवर्गम् । लोकम् । इयाव ।

सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोक मियावे याव लोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोक मियाव ।

(20)[P11] 7.1.4.1(17)– सुवर्गम् ।

सुवर्गमिति सुवः – गम् ।

(21)[P11] 7.1.4.1(18)– लोकम् । इयाव । इति । (GS–7.1–10)

लोक मियावे याव लोकम् ँलोक मियावे तीतीयाव लोकम् ँलोक मिया वेति ।

(22)[P11] 7.1.4.1(19)– इयाव । इति । तौ । (GS–7.1–10)

इयावे तीतीयावे यावेति तौ ता वितीयावे यावेति तौ ।

(23)[P11] 7.1.4.1(20)– इति । तौ । एतम् । (GS–7.1–10)

इति तौ ता वितीति ता वेत मेतम् ता वितीति ता वेतम् ।

(24)[P11] 7.1.4.1(21)– तौ । एतम् । द्विरात्रम् । (GS–7.1–10)

ता वेत मेतम् तौ ता वेतम् द्विरात्रम् द्विरात्र मेतम् तौ ता वेतम् द्विरात्रम् ।

(25)[P11] 7.1.4.1(22)– एतम् । द्विरात्रम् । अपश्यताम् । (GS–7.1–10)

एतम् द्विरात्रम् द्विरात्र मेत मेतम् द्विरात्र मपश्यता मपश्यताम् द्विरात्र मेत मेतम् द्विरात्र मपश्यताम् ।

(26)[P11] 7.1.4.1(23)– द्विरात्रम् । अपश्यताम् । तम् । (GS–7.1–10)

द्विरात्र मपश्यता मपश्यताम् द्विरात्रम् द्विरात्र मपश्यताम् तम् त मपश्यताम् द्विरात्रम् द्विरात्र मपश्यताम् तम् ।

(27)[P11] 7.1.4.1(23)– द्विरात्रम् । (GS–7.1–10)

द्विरात्रमिति द्वि – रात्रम् ।

(28)[P11] 7.1.4.1(24)– अपश्यताम् । तम् । आ ।

अपश्यताम् तम् त मपश्यता मपश्यताम् त मा त मपश्यता मपश्यताम् त मा ।

(29)[P11] 7.1.4.1(25)– तम् । आ । अहरताम् ।

त मा तम् त मा ऽहरता महरता मा तम् त मा ऽहरताम् ।

(30)[P11] 7.1.4.1(26)– आ । अहरताम् । तेन ।

आ ऽहरता महरता मा ऽहरताम् तेन तेना हरता मा ऽहरताम् तेन ।

(31)[P11] 7.1.4.1(27)– अहरताम् । तेन । अयजेताम् ।

अहरताम् तेन तेना हरता महरताम् तेना यजेता मयजेताम् तेना हरता महरताम् तेना यजेताम् ।

(32)[P11] 7.1.4.1(28)– तेन । अयजेताम् । ततः ।

तेना यजेता मयजेताम् तेन तेना यजेताम् तत स्ततो ऽयजेताम् तेन तेना यजेताम् ततः ।

(33)[P11] 7.1.4.1(29)– अयजेताम् । ततः । वै ।

अयजेताम् तत स्ततो ऽयजेता मयजेताम् ततो वै वै ततो ऽयजेता मयजेताम् ततो वै ।

(34)[P11] 7.1.4.1(30)– ततः । वै । तौ ।

ततो वै वै तत स्ततो वै तौ तौ वै तत स्ततो वै तौ ।

(35)[P11] 7.1.4.1(31)– वै । तौ । सुवर्गम् ।

वै तौ तौ वै वै तौ सुवर्ग(ग्म्) सुवर्गम् तौ वै वै तौ सुवर्गम् ।

(36)[P11] 7.1.4.1(32)– तौ । सुवर्गम् । लोकम् ।

तौ सुवर्ग(ग्म्) सुवर्गम् तौ तौ सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्गम् तौ तौ सुवर्गम् ँलोकम् ।

(37)[P11] 7.1.4.1(33)– सुवर्गम् । लोकम् । ऐताम् ।

सुवर्गम् ँलोकम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोक मैता मैताम् ँलोक(ग्म्) सुवर्ग(ग्म्) सुवर्गम् ँलोक मैताम् ।

(38)[P11] 7.1.4.1(33)– सुवर्गम् ।

सुवर्गमिति सुवः – गम् ।

(39)[P11] 7.1.4.1(34)– लोकम् । ऐताम् । यः ।

लोक मैता मैताम् ँलोकम् ँलोक मैतां ँयो य ऐताम् ँलोकम् ँलोक मैतां ँयः ।

(40)[P11] 7.1.4.1(35)– ऐताम् । यः । एवम् ।

ऐतां ँयो य ऐता मैतां ँय एव मेवं ँय ऐता मैतां ँय एवम् ।

(41)[P11] 7.1.4.1(36)– यः । एवम् । विद्वान् ।

य एव मेवं ँयो य एवं ँविद्वान्. विद्वा नेवं ँयो य एवं ँविद्वान् ।

(42)[P11] 7.1.4.1(37)– एवम् । विद्वान् । द्विरात्रेण ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् द्विरात्रेण द्विरात्रेण विद्वा नेव मेवं ँविद्वान् द्विरात्रेण ।

(43)[P11] 7.1.4.1(38)– विद्वान् । द्विरात्रेण । यजते ।

विद्वान् द्विरात्रेण द्विरात्रेण विद्वान्. विद्वान् द्विरात्रेण यजते यजते द्विरात्रेण विद्वान्. विद्वान् द्विरात्रेण यजते ।

(44)[P11] 7.1.4.1(39)– द्विरात्रेण । यजते । सुवर्गम् ।

द्विरात्रेण यजते यजते द्विरात्रेण द्विरात्रेण यजते सुवर्ग(ग्म्) सुवर्गं ँयजते द्विरात्रेण द्विरात्रेण यजते सुवर्गम् ।

(45)[P11] 7.1.4.1(39)– द्विरात्रेण ।

द्विरात्रेणेति द्वि – रात्रेण ।

(46)[P11] 7.1.4.1(40)– यजते । सुवर्गम् । एव ।

यजते सुवर्ग(ग्म्) सुवर्गं ँयजते यजते सुवर्ग मेवैव सुवर्गं ँयजते यजते सुवर्ग मेव ।

(47)[P11] 7.1.4.1(41)– सुवर्गम् । एव । लोकम् ।

सुवर्ग मेवैव सुवर्ग(ग्म्) सुवर्ग मेव लोकम् ँलोक मेव सुवर्ग(ग्म्) सुवर्ग मेव लोकम् ।

(48)[P11] 7.1.4.1(41)– सुवर्गम् ।

सुवर्गमिति सुवः – गम् ।

(49)[P11] 7.1.4.1(42)– एव । लोकम् । एति ।

एव लोकम् ँलोक मेवैव लोक मेत्येति लोक मेवैव लोक मेति ।

(50)[P11] 7.1.4.1(43)– लोकम् । एति । तौ ।

लोक मेत्येति लोकम् ँलोक मेति तौ ता वेति लोकम् ँलोक मेति तौ ।

(51)[P11] 7.1.4.1(44)– एति । तौ । ऐताम् ।

एति तौ ता वेत्येति ता वैता मैताम् ता वेत्येति ता वैताम् ।

(52)[P11] 7.1.4.1(45)– तौ । ऐताम् । पूर्वेण ।

ता वैता मैताम् तौ ता वैताम् पूर्वेण पूर्वे णैताम् तौ ता वैताम् पूर्वेण ।

(53)[P11] 7.1.4.1(46)– ऐताम् । पूर्वेण । अह्ना ।

ऐताम् पूर्वेण पूर्वे णैता मैताम् पूर्वे णाह्ना ऽह्ना पूर्वे णैता मैताम् पूर्वे णाह्ना ।

(54)[P11] 7.1.4.1(47)– पूर्वेण । अह्ना । अगच्छताम् ।

पूर्वे णाह्ना ऽह्ना पूर्वेण पूर्वे णाह्ना ऽगच्छता मगच्छता मह्ना पूर्वेण पूर्वे णाह्ना ऽगच्छताम् ।

(55)[P11] 7.1.4.1(48)– अह्ना । अगच्छताम् । उत्तरेण ।

अह्ना ऽगच्छता मगच्छता मह्ना ऽह्ना ऽगच्छता मुत्तरे णोत्तरेणा गच्छता मह्ना ऽह्ना ऽगच्छता मुत्तरेण ।

(56)[P11] 7.1.4.1(49)– अगच्छताम् । उत्तरेण । अभिप्लवः ।

अगच्छता मुत्तरे णोत्तरेणा गच्छता मगच्छता मुत्तरेणा भिप्लवो ऽभिप्लव उत्तरेणा गच्छता मगच्छता मुत्तरेणा भिप्लवः ।

(57)[P11] 7.1.4.1(50)– उत्तरेण । अभिप्लवः । पूर्वम् ।

उत्तरेणा भिप्लवो ऽभिप्लव उत्तरे णोत्तरेणा भिप्लवः पूर्वम् पूर्व मभिप्लव उत्तरे णोत्तरेणा भिप्लवः पूर्वम् ।

(58)[P11] 7.1.4.1(50)– उत्तरेण ।

उत्तरेणेत्युत् – तरेण ।

(1)[P12] 7.1.4.2(1)– अभिप्लवः । पूर्वम् । अहः ।

अभिप्लवः पूर्वम् पूर्व मभिप्लवो ऽभिप्लवः पूर्व मह रहः पूर्व मभिप्लवो ऽभिप्लवः पूर्व महः ।

(2)[P12] 7.1.4.2(1)– अभिप्लवः ।

अभिप्लव इत्यभि – प्लवः ।

(3)[P12] 7.1.4.2(2)– पूर्वम् । अहः । भवति ।

पूर्व मह रहः पूर्वम् पूर्व महर् भवति भव त्यहः पूर्वम् पूर्व महर् भवति ।

(4)[P12] 7.1.4.2(3)- अहः । भवति । गतिः ।

अहर् भवति भव त्यह रहर् भवति गतिर् गतिर् भव त्यह रहर् भवति गतिः ।

(5)[P12] 7.1.4.2(4)- भवति । गतिः । उत्तरम् ।

भवति गतिर् गतिर् भवति भवति गति रुत्तर मुत्तरम् गतिर् भवति भवति गति रुत्तरम् ।

(6)[P12] 7.1.4.2(5)- गतिः । उत्तरम् । ज्योतिष्टोमः ।

गति रुत्तर मुत्तरम् गतिर् गति रुत्तरम् ज्योतिष्टोमो ज्योतिष्टोम उत्तरम् गतिर् गति रुत्तरम् ज्योतिष्टोमः ।

(7)[P12] 7.1.4.2(6)- उत्तरम् । ज्योतिष्टोमः । अग्निष्टोमः ।

उत्तरम् ज्योतिष्टोमो ज्योतिष्टोम उत्तर मुत्तरम् ज्योतिष्टोमो ऽग्निष्टोमो ऽग्निष्टोमो ज्योतिष्टोम उत्तर मुत्तरम् ज्योतिष्टोमो ऽग्निष्टोमः ।

(8)[P12] 7.1.4.2(6)- उत्तरम् ।

उत्तरमित्युत् - तरम् ।

(9)[P12] 7.1.4.2(7)- ज्योतिष्टोमः । अग्निष्टोमः । पूर्वम् ।

ज्योतिष्टोमो ऽग्निष्टोमो ऽग्निष्टोमो ज्योतिष्टोमो ज्योतिष्टोमो ऽग्निष्टोमः पूर्वम् पूर्व मग्निष्टोमो ज्योतिष्टोमो ज्योतिष्टोमो ऽग्निष्टोमः पूर्वम् ।

(10)[P12] 7.1.4.2(7)- ज्योतिष्टोमः ।

ज्योतिष्टोम इति ज्योति - स्तोमः ।

(11)[P12] 7.1.4.2(8)- अग्निष्टोमः । पूर्वम् । अहः ।

अग्निष्टोमः पूर्वम् पूर्व मग्निष्टोमो ऽग्निष्टोमः पूर्व मह रहः पूर्व मग्निष्टोमो ऽग्निष्टोमः पूर्व महः ।

(12)[P12] 7.1.4.2(8)- अग्निष्टोमः ।

अग्निष्टोम इत्यग्नि - स्तोमः ।

(13)[P12] 7.1.4.2(9)- पूर्वम् । अहः । भवति ।

पूर्व मह रहः पूर्वम् पूर्व महर् भवति भव त्यहः पूर्वम् पूर्व महर् भवति ।

(14)[P12] 7.1.4.2(10)- अहः । भवति । तेजः ।

अहर् भवति भव त्यह रहर् भवति तेज स्तेजो भव त्यह रहर् भवति तेजः ।

(15)[P12] 7.1.4.2(11)- भवति । तेजः । तेन ।

भवति तेज स्तेजो भवति भवति तेज स्तेन तेन तेजो भवति भवति तेज स्तेन ।

(16)[P12] 7.1.4.2(12)- तेजः । तेन । अव ।

तेज स्तेन तेन तेज स्तेज स्तेना वाव तेन तेज स्तेज स्तेनाव ।

(17)[P12] 7.1.4.2(13)- तेन । अव । रुन्धे ।

तेना वाव तेन तेनाव रुन्धे रुन्धे ऽव तेन तेनाव रुन्धे ।

(18)[P12] 7.1.4.2(14)- अव । रुन्धे । सर्वस्तोमः ।

अव रुन्धे रुन्धे ऽवाव रुन्धे सर्वस्तोमः सर्वस्तोमो रुन्धे ऽवाव रुन्धे सर्वस्तोमः ।

(19)[P12] 7.1.4.2(15)- रुन्धे । सर्वस्तोमः । अतिरात्रः ।

रुन्धे सर्वस्तोमः सर्वस्तोमो रुन्धे रुन्धे सर्वस्तोमो ऽतिरात्रो ऽतिरात्रः सर्वस्तोमो रुन्धे रुन्धे सर्वस्तोमो ऽतिरात्रः ।

(20)[P12] 7.1.4.2(16)- सर्वस्तोमः । अतिरात्रः । उत्तरम् ।

सर्वस्तोमो ऽतिरात्रो ऽतिरात्रः सर्वस्तोमः सर्वस्तोमो ऽतिरात्र उत्तर मुत्तर मतिरात्रः सर्वस्तोमः सर्वस्तोमो ऽतिरात्र उत्तरम् ।

(21)[P12] 7.1.4.2(16)– सर्वस्तोमः ।

सर्वस्तोम इति सर्व – स्तोमः ।

(22)[P12] 7.1.4.2(17)– अतिरात्रः । उत्तरम् । सर्वस्य ।

अतिरात्र उत्तर मुत्तर मतिरात्रो ऽतिरात्र उत्तर(ग्म्) सर्वस्य सर्वस्योत्तर मतिरात्रो ऽतिरात्र उत्तर(ग्म्) सर्वस्य ।

(23)[P12] 7.1.4.2(17)– अतिरात्रः ।

अतिरात्र इत्यति – रात्रः ।

(24)[P12] 7.1.4.2(18)– उत्तरम् । सर्वस्य । आप्त्यै ।

उत्तर(ग्म्) सर्वस्य सर्वस्योत्तर मुत्तर(ग्म्) सर्व स्याप्त्या आप्त्यै सर्वस्योत्तर मुत्तर(ग्म्) सर्व स्याप्त्यै ।

(25)[P12] 7.1.4.2(18)– उत्तरम् ।

उत्तरमित्युत् – तरम् ।

(26)[P12] 7.1.4.2(19)– सर्वस्य । आप्त्यै । सर्वस्य ।

सर्व स्याप्त्या आप्त्यै सर्वस्य सर्व स्याप्त्यै सर्वस्य सर्व स्याप्त्यै सर्वस्य सर्वस्याप्त्यै सर्वस्य ।

(27)[P12] 7.1.4.2(20)– आप्त्यै । सर्वस्य । अवरुद्ध्यै ।

आप्त्यै सर्वस्य सर्वस्याप्त्या आप्त्यै सर्वस्या वरुद्ध्या अवरुद्ध्यै सर्व स्याप्त्या आप्त्यै सर्व स्यावरुद्ध्यै ।

(28)[P12] 7.1.4.2(21)– सर्वस्य । अवरुद्ध्यै । गायत्रम् ।

सर्व स्यावरुद्ध्या अवरुद्ध्यै सर्वस्य सर्व स्यावरुद्ध्यै गायत्रम् गायत्र मवरुद्ध्यै सर्वस्य सर्व स्यावरुद्ध्यै गायत्रम् ।

(29)[P12] 7.1.4.2(22)- अवरुद्ध्यै । गायत्रम् । पूर्वे ।

अवरुद्ध्यै गायत्रम् गायत्र मवरुद्ध्या अवरुद्ध्यै गायत्रम् पूर्वे पूर्वे गायत्र मवरुद्ध्या अवरुद्ध्यै गायत्रम् पूर्वे ।

(30)[P12] 7.1.4.2(22)- अवरुद्ध्यै ।

अवरुद्ध्या इत्यव - रुद्ध्यै ।

(31)[P12] 7.1.4.2(23)- गायत्रम् । पूर्वे । अहन्न् ।

गायत्रम् पूर्वे पूर्वे गायत्रम् गायत्रम् पूर्वे ऽहन् नहन् पूर्वे गायत्रम् गायत्रम् पूर्वे ऽहन्न् ।

(32)[P12] 7.1.4.2(24)- पूर्वे । अहन्न् । साम ।

पूर्वे ऽहन् नहन् पूर्वे पूर्वे ऽहन् थ्साम सामाहन् पूर्वे पूर्वे ऽहन् थ्साम ।

(33)[P12] 7.1.4.2(25)- अहन्न् । साम । भवति ।

अहन् थ्साम सामाहन् नहन् थ्साम भवति भवति सामाहन् नहन् थ्साम भवति ।

(34)[P12] 7.1.4.2(26)- साम । भवति । तेजः ।

साम भवति भवति साम साम भवति तेज स्तेजो भवति साम साम भवति तेजः ।

(35)[P12] 7.1.4.2(27)- भवति । तेजः । वै ।

भवति तेज स्तेजो भवति भवति तेजो वै वै तेजो भवति भवति तेजो वै ।

(36)[P12] 7.1.4.2(28)- तेजः । वै । गायत्री ।

तेजो वै वै तेज स्तेजो वै गायत्री गायत्री वै तेज स्तेजो वै गायत्री ।

(37)[P12] 7.1.4.2(29)- वै । गायत्री । गायत्री ।

वै गायत्री गायत्री वै वै गायत्री ।

(38)[P12] 7.1.4.2(30)- गायत्री । गायत्री ।

गायत्री गायत्री ।

(39)[P12] 7.1.4.2(31)– गायत्री । ब्रह्मवर्चसम् । तेजः ।

विष्णुश्च च विष्णुर् विष्णुश्च व्यायच्छेतां ँव्यायच्छेताम् च विष्णुर् विष्णुश्च व्यायच्छेताम् ।

(26)[P18] 7.1.5.5(22)- च । व्यायच्छेताम् । सः ।

च व्यायच्छेतां ँव्यायच्छेताम् च च व्यायच्छेता(ग्म्) स स व्यायच्छेताम् च च व्यायच्छेता(ग्म्) सः ।

(27)[P18] 7.1.5.5(23)- व्यायच्छेताम् । सः । इन्द्रः ।

व्यायच्छेता(ग्म्) स स व्यायच्छेतां ँव्यायच्छेता(ग्म्) स इन्द्र इन्द्रः स व्यायच्छेतां ँव्यायच्छेता(ग्म्) स इन्द्रः ।

(28)[P18] 7.1.5.5(23)- व्यायच्छेताम् ।

व्यायच्छेतामिति वि - आयच्छेताम् ।

(29)[P18] 7.1.5.5(24)– सः । इन्द्रः । अमन्यत ।

स इन्द्र इन्द्रः स स इन्द्रो ऽमन्यता मन्यतेन्द्रः स स इन्द्रो ऽमन्यत ।

(30)[P18] 7.1.5.5(25)– इन्द्रः । अमन्यत । अनया ।

इन्द्रो ऽमन्यता मन्यतेन्द्र इन्द्रो ऽमन्यता नया ऽनया ऽमन्यतेन्द्र इन्द्रो ऽमन्यता नया ।

(31)[P18] 7.1.5.5(26)– अमन्यत । अनया । वै ।

अमन्यता नया ऽनया ऽमन्यता मन्यता नया वै वा अनया ऽमन्यता मन्यता नया वै ।

(32)[P18] 7.1.5.5(27)– अनया । वै । इदम् ।

अनया वै वा अनया ऽनया वा इद मिदं ँवा अनया ऽनया वा इदम् ।

(33)[P18] 7.1.5.5(28)– वै । इदम् । विष्णुः ।

वा इद मिदं ँवै वा इदं ँविष्णुर् विष्णु रिदं ँवै वा इदं ँविष्णुः ।

(34)[P18] 7.1.5.5(29)– इदम् । विष्णुः । सहस्रम् ।

इदं ँविष्णुर् विष्णु रिद मिदं ँविष्णुः सहस्र(ग्म्) सहस्रं ँविष्णु रिद मिदं ँविष्णुः सहस्रम् ।

(35)[P18] 7.1.5.5(30)– विष्णुः । सहस्रम् । वक्ष्यते ।

विष्णुः सहस्र(ग्म्) सहस्रं ँविष्णुर् विष्णुः सहस्रं ँवक्ष्यते वक्ष्यते सहस्रं ँविष्णुर् विष्णुः सहस्रं ँवक्ष्यते ।

(36)[P18] 7.1.5.5(31)– सहस्रम् । वक्ष्यते । इति ।

सहस्रं ँवक्ष्यते वक्ष्यते सहस्र(ग्म्) सहस्रं ँवक्ष्यत इतीति वक्ष्यते सहस्र(ग्म्) सहस्रं ँवक्ष्यत इति ।

(37)[P18] 7.1.5.5(32)– वक्ष्यते । इति । तस्याम् ।

वक्ष्यत इतीति वक्ष्यते वक्ष्यत इति तस्याम् तस्या मिति वक्ष्यते वक्ष्यत इति तस्याम् ।

(38)[P18] 7.1.5.5(33)– इति । तस्याम् । अकल्पेताम् ।

इति तस्याम् तस्या मितीति तस्या मकल्पेता मकल्पेताम् तस्या मितीति तस्या मकल्पेताम् ।

(39)[P18] 7.1.5.5(34)– तस्याम् । अकल्पेताम् । द्विभागे ।

तस्या मकल्पेता मकल्पेताम् तस्याम् तस्या मकल्पेताम् द्विभागे द्विभागे ऽकल्पेताम् तस्याम् तस्या मकल्पेताम् द्विभागे ।

(40)[P18] 7.1.5.5(35)– अकल्पेताम् । द्विभागे । इन्द्रः ।

अकल्पेताम् द्विभागे द्विभागे ऽकल्पेता मकल्पेताम् द्विभाग इन्द्र इन्द्रो द्विभागे ऽकल्पेता मकल्पेताम् द्विभाग इन्द्रः ।

(41)[P18] 7.1.5.5(36)– द्विभागे । इन्द्रः । तृतीये ।

द्विभाग इन्द्र इन्द्रो द्विभागे द्विभाग इन्द्र स्तृतीये तृतीय इन्द्रो द्विभागे द्विभाग इन्द्र स्तृतीये ।

(42)[P18] 7.1.5.5(36)– द्विभागे ।

द्विभाग इति द्वि – भागे ।

(43)[P18] 7.1.5.5(37)– इन्द्रः । तृतीये । विष्णुः ।

इन्द्र स्तृतीये तृतीय इन्द्र इन्द्र स्तृतीये विष्णुर् विष्णु स्तृतीय इन्द्र इन्द्र स्तृतीये विष्णुः ।

(44)[P18] 7.1.5.5(38)– तृतीये । विष्णुः । तत् ।

तृतीये विष्णुर् विष्णु स्तृतीये तृतीये विष्णु स्तत् तद् विष्णु स्तृतीये तृतीये विष्णु स्तत् ।

(45)[P18] 7.1.5.5(39)– विष्णुः । तत् । वै ।

विष्णु स्तत् तद् विष्णुर् विष्णु स्तद् वै वै तद् विष्णुर् विष्णु स्तद् वै ।

(46)[P18] 7.1.5.5(40)– तत् । वै । एषा ।

तद् वै वै तत् तद् वा एषैषा वै तत् तद् वा एषा ।

(47)[P18] 7.1.5.5(41)– वै । एषा । अभ्यनूच्यते ।

वा एषैषा वै वा एषा ऽभ्यनूच्यते ऽभ्यनूच्यत एषा वै वा एषा ऽभ्यनूच्यते ।

(48)[P18] 7.1.5.5(42)– एषा । अभ्यनूच्यते । उभा ।

एषा ऽभ्यनूच्यते ऽभ्यनूच्यत एषैषा ऽभ्यनूच्यत उभोभा ऽभ्यनूच्यत एषैषा ऽभ्यनूच्यत उभा ।

(49)[P18] 7.1.5.5(43)– अभ्यनूच्यते । उभा । जिग्यथुः ।

अभ्यनूच्यत उभोभा ऽभ्यनूच्यते ऽभ्यनूच्यत उभा जिग्यथुर् जिग्यथु रुभा ऽभ्यनूच्यते ऽभ्यनूच्यत उभा जिग्यथुः ।

(50)[P18] 7.1.5.5(43)– अभ्यनूच्यते ।

अभ्यनूच्यत इत्यभि – अनूच्यते ।

(51)[P18] 7.1.5.5(44)– उभा । जिग्यथुः । इति ।

उभा जिग्यथुर् जिग्यथु रुभोभा जिग्यथु रितीति जिग्यथु रुभोभा जिग्यथु रिति ।

(52)[P18] 7.1.5.5(45)– जिग्यथुः । इति । ताम् ।

जिग्यथु रितीति जिग्यथुर् जिग्यथु रिति ताम् ता मिति जिग्यथुर् जिग्यथु रिति ताम् ।

(53)[P18] 7.1.5.5(46)– इति । ताम् । वै ।

इति ताम् ता मितीति तां ँवै वै ता मितीति तां ँवै ।

(54)[P18] 7.1.5.5(47)– ताम् । वै । एताम् ।

तां ँवै वै ताम् तां ँवा एता मेतां ँवै ताम् तां ँवा एताम् ।

(55)[P18] 7.1.5.5(48)– वै । एताम् । अच्छावाकः ।

वा एता मेतां ँवै वा एता मच्छावाको ऽच्छावाक एतां ँवै वा एता मच्छावाकः ।

(56)[P18] 7.1.5.5(49)– एताम् । अच्छावाकः । एव ।

एता मच्छावाको ऽच्छावाक एता मेता मच्छावाक एवै वाच्छावाक एता मेता मच्छावाक एव ।

(57)[P18] 7.1.5.5(50)- अच्छावाकः । एव । शꣳसति ।

अच्छावाक एवै वाच्छावाको ऽच्छावाक एव शꣳसति शꣳस त्येवाच्छावाको ऽच्छावाक एव शꣳसति ।

(1)[P19] 7.1.5.6(1)- एव । शꣳसति । अथ । (GS-7.1-16)

एव शꣳसति शꣳस त्येवैव शꣳस त्यथाथ शꣳस त्येवैव शꣳस त्यथ ।

(2)[P19] 7.1.5.6(2)- शꣳसति । अथ । या । (GS-7.1-16)

शꣳस त्यथाथ शꣳसति शꣳस त्यथ या या ऽथ शꣳसति शꣳस त्यथ या ।

(3)[P19] 7.1.5.6(3)- अथ । या । सहस्रतमी । (GS-7.1-16)

अथ या या ऽथाथ या सहस्रतमी सहस्रतमी या ऽथाथ या सहस्रतमी ।

(4)[P19] 7.1.5.6(4)- या । सहस्रतमी । सा । (GS-7.1-16)

या सहस्रतमी सहस्रतमी या या सहस्रतमी सा सा सहस्रतमी या या सहस्रतमी सा ।

(5)[P19] 7.1.5.6(5)- सहस्रतमी । सा । होत्रे । (GS-7.1-16)

सहस्रतमी सा सा सहस्रतमी सहस्रतमी सा होत्रे होत्रे सा सहस्रतमी सहस्रतमी सा होत्रे ।

(6)[P19] 7.1.5.6(5)- सहस्रतमी । (GS-7.1-16)

सहस्रतमीति सहस्र - तमी ।

(7)[P19] 7.1.5.6(6)- सा । होत्रे । देया । (GS-7.1-16)

सा होत्रे होत्रे सा सा होत्रे देया देया होत्रे सा सा होत्रे देया ।

(8)[P19] 7.1.5.6(7)- होत्रे । देया । इति ।

होत्रे देया देया होत्रे होत्रे देयेतीति देया होत्रे होत्रे देयेति ।

(9)[P19] 7.1.5.6(8)- देया । इति । होतारम् ।

देयेतीति देया देयेति होतारꣳ होतार मिति देया देयेति होतारम् ।

(10)[P19] 7.1.5.6(9)– इति । होतारम् । वै ।

इति होतार(ग्म्) होतार मितीति होतारं ँवै वै होतार मितीति होतारं ँवै ।

(11)[P19] 7.1.5.6(10)– होतारम् । वै । अभ्यतिरिच्यते ।

होतारं ँवै वै होतार(ग्म्) होतारं ँवा अभ्यतिरिच्यते ऽभ्यतिरिच्यते वै होतार(ग्म्) होतारं ँवा अभ्यतिरिच्यते ।

(12)[P19] 7.1.5.6(11)– वै । अभ्यतिरिच्यते । यत् ।

वा अभ्यतिरिच्यते ऽभ्यतिरिच्यते वै वा अभ्यतिरिच्यते यद् यदभ्यतिरिच्यते वै वा अभ्यतिरिच्यते यत् ।

(13)[P19] 7.1.5.6(12)– अभ्यतिरिच्यते । यत् । अतिरिच्यते ।

अभ्यतिरिच्यते यद् यदभ्यतिरिच्यते ऽभ्यतिरिच्यते यदतिरिच्यते ऽतिरिच्यते यदभ्यतिरिच्यते ऽभ्यतिरिच्यते यदतिरिच्यते ।

(14)[P19] 7.1.5.6(12)– अभ्यतिरिच्यते ।

अभ्यतिरिच्यत इत्यभि – अतिरिच्यते ।

(15)[P19] 7.1.5.6(13)– यत् । अतिरिच्यते । होता ।

यदतिरिच्यते ऽतिरिच्यते यद् यदतिरिच्यते होता होता ऽतिरिच्यते यद् यदतिरिच्यते होता ।

(16)[P19] 7.1.5.6(14)– अतिरिच्यते । होता । अनाप्तस्य ।

अतिरिच्यते होता होता ऽतिरिच्यते ऽतिरिच्यते होता ऽनाप्तस्या नाप्तस्य होता ऽतिरिच्यते ऽतिरिच्यते होता ऽनाप्तस्य ।

(17)[P19] 7.1.5.6(14)– अतिरिच्यते ।

अतिरिच्यत इत्यति – रिच्यते ।

(18)[P19] 7.1.5.6(15)- होता । अनाप्तस्य । आपयिता ।

होता ऽनाप्तस्या नाप्तस्य होता होता ऽनाप्तस्या पयिता ऽऽपयिता ऽनाप्तस्य होता होता ऽनाप्तस्या पयिता ।

(19)[P19] 7.1.5.6(16)- अनाप्तस्य । आपयिता । अथ । (GD-41,GS-7.1-15)

अनाप्तस्या पयिता ऽऽपयिता ऽनाप्तस्या नाप्तस्या पयिता ऽथाथा पयिता ऽनाप्तस्या नाप्तस्या पयिता ऽथ ।

(20)[P19] 7.1.5.6(17)- आपयिता । अथ । आहुः । (GD-41,GS-7.1-15)

आपयिता ऽथाथा पयिता ऽऽपयिता ऽथाहु राहु रथा पयिता ऽऽपयिता ऽथाहुः ।

(21)[P19] 7.1.5.6(18)- अथ । आहुः । उन्नेत्रे । (GD-41,GS-7.1-15)

अथाहु राहु रथा थाहु रुन्नेत्र उन्नेत्र आहुर् अथाथाहु रुन्नेत्रे ।

(22)[P19] 7.1.5.6(19)- आहुः । उन्नेत्रे । देया । (GD-41,GS-7.1-15)

आहु रुन्नेत्र उन्नेत्र आहु राहु रुन्नेत्रे देया देयोन्नेत्र आहु राहु रुन्नेत्रे देया ।

(23)[P19] 7.1.5.6(20)- उन्नेत्रे । देया । इति । (GS-7.1-15)

उन्नेत्रे देया देयोन्नेत्र उन्नेत्रे देयेतीति देयोन्नेत्र उन्नेत्रे देयेति ।

(24)[P19] 7.1.5.6(20)- उन्नेत्रे । (GS-7.1-15)

उन्नेत्र इत्युत् - नेत्रे ।

(25)[P19] 7.1.5.6(21)- देया । इति । अतिरिक्ता ।

देयेतीति देया देये त्यतिरिक्ता ऽतिरिक्तेति देया देये त्यतिरिक्ता ।

(26)[P19] 7.1.5.6(22)- इति । अतिरिक्ता । वै ।

इत्यतिरिक्ता ऽतिरिक्तेती त्यतिरिक्ता वै वा अतिरिक्तेती त्यतिरिक्ता वै ।

(27)[P19] 7.1.5.6(23)– अतिरिक्ता । वै । एषा ।

अतिरिक्ता वै वा अतिरिक्ता ऽतिरिक्ता वा एषैषा वा अतिरिक्ता ऽतिरिक्ता वा एषा ।

(28)[P19] 7.1.5.6(23)– अतिरिक्ता ।

अतिरिक्तेत्यति – रिक्ता ।

(29)[P19] 7.1.5.6(24)– वै । एषा । सहस्रस्य ।

वा एषैषा वै वा एषा सहस्रस्य सहस्र स्यैषा वै वा एषा सहस्रस्य ।

(30)[P19] 7.1.5.6(25)– एषा । सहस्रस्य । अतिरिक्तः ।

एषा सहस्रस्य सहस्र स्यैषैषा सहस्र स्यातिरिक्तो ऽतिरिक्तः सहस्र स्यैषैषा सहस्र स्यातिरिक्तः ।

(31)[P19] 7.1.5.6(26)– सहस्रस्य । अतिरिक्तः । उन्नेता ।

सहस्र स्यातिरिक्तो ऽतिरिक्तः सहस्रस्य सहस्र स्यातिरिक्त उन्ने तोन्नेता ऽतिरिक्तः सहस्रस्य सहस्र स्यातिरिक्त उन्नेता ।

(32)[P19] 7.1.5.6(27)– अतिरिक्तः । उन्नेता । ऋत्विजाम् ।

अतिरिक्त उन्ने तोन्नेता ऽतिरिक्तो ऽतिरिक्त उन्नेत र्त्विजा मृत्विजा मुन्नेता ऽतिरिक्तो ऽतिरिक्त उन्नेत र्त्विजाम् ।

(33)[P19] 7.1.5.6(27)– अतिरिक्तः ।

अतिरिक्त इत्यति – रिक्तः ।

(34)[P19] 7.1.5.6(28)– उन्नेता । ऋत्विजाम् । अथ ।

उन्नेत र्त्विजा मृत्विजा मुन्ने तोन्नेत र्त्विजा मथाथ र्त्विजा मुन्ने तोन्नेत र्त्विजा मथ ।

(35)[P19] 7.1.5.6(28)– उन्नेता ।

उन्नेतेत्युत् – नेता ।

(36)[P19] 7.1.5.6(29)– ऋत्विजाम् । अथ । आहुः ।

ऋत्विजा मथाथ र्त्विजा मृत्विजा मथाहु राहु रथ र्त्विजा मृत्विजा मथाहुः ।

(37)[P19] 7.1.5.6(30)– अथ । आहुः । सर्वेभ्यः ।

अथाहु राहु रथा थाहुः सर्वेभ्यः सर्वेभ्य आहु रथा थाहुः सर्वेभ्यः ।

(38)[P19] 7.1.5.6(31)– आहुः । सर्वेभ्यः । सदस्येभ्यः ।

आहुः सर्वेभ्यः सर्वेभ्य आहु राहुः सर्वेभ्यः सदस्येभ्यः सदस्येभ्यः सर्वेभ्य आहु राहुः सर्वेभ्यः सदस्येभ्यः ।

(39)[P19] 7.1.5.6(32)– सर्वेभ्यः । सदस्येभ्यः । देया ।

सर्वेभ्यः सदस्येभ्यः सदस्येभ्यः सर्वेभ्यः सर्वेभ्यः सदस्येभ्यो देया देया सदस्येभ्यः सर्वेभ्यः सर्वेभ्यः सदस्येभ्यो देया ।

(40)[P19] 7.1.5.6(33)– सदस्येभ्यः । देया । इति ।

सदस्येभ्यो देया देया सदस्येभ्यः सदस्येभ्यो देयेतीति देया सदस्येभ्यः सदस्येभ्यो देयेति ।

(41)[P19] 7.1.5.6(34)– देया । इति । अथ ।

देये तीति देया देये त्यथा थेति देया देये त्यथ ।

(42)[P19] 7.1.5.6(35)– इति । अथ । आहुः ।

इत्य थाथे तीत्यथाहु राहु रथेती त्यथाहुः ।

(43)[P19] 7.1.5.6(36)– अथ । आहुः । उदाकृत्या ।

अथाहु राहु रथा थाहु रुदाकृत्यो दाकृत्या ऽऽहु रथा थाहु रुदाकृत्या ।

(44)[P19] 7.1.5.6(37)– आहुः । उदाकृत्या । सा ।

आहु रुदाकृत्यो दाकृत्या ऽऽहु राहु रुदाकृत्या सा सोदा कृत्या ऽऽहु राहु रुदाकृत्या सा ।

(45)[P19] 7.1.5.6(38)– उदाकृत्या । सा । वशम् ।

उदाकृत्या सा सोदाकृत्यो दाकृत्या सा वशं ँवश(ग्म्) सोदाकृत्यो दाकृत्या सा वशम् ।

(46)[P19] 7.1.5.6(38)– उदाकृत्या ।

उदाकृत्येत्युत् – आकृत्या ।

(47)[P19] 7.1.5.6(39)– सा । वशम् । चरेत् ।

सा वशं ँवश(ग्म्) सा सा वशम् चरेच् चरेद् वश(ग्म्) सा सा वशम् चरेत् ।

(48)[P19] 7.1.5.6(40)– वशम् । चरेत् । इति ।

वशम् चरेच् चरेद् वशं ँवशम् चरे दितीति चरेद् वशं ँवशम् चरे दिति ।

(49)[P19] 7.1.5.6(41)– चरेत् । इति । अथ ।

चरे दितीति चरेच् चरे दित्यथा थेति चरेच् चरे दित्यथ ।

(50)[P19] 7.1.5.6(42)– इति । अथ । आहुः ।

इत्य था थेती त्यथाहु राहु रथेती त्यथाहुः ।

(51)[P19] 7.1.5.6(43)– अथ । आहुः । ब्रह्मणे ।

अथाहु राहु रथा थाहुर् ब्रह्मणे ब्रह्मण आहु रथा थाहुर् ब्रह्मणे ।

(52)[P19] 7.1.5.6(44)– आहुः । ब्रह्मणे । च ।

आहुर् ब्रह्मणे ब्रह्मण आहु राहुर् ब्रह्मणे च च ब्रह्मण आहु राहुर् ब्रह्मणे च ।

(53)[P19] 7.1.5.6(45)– ब्रह्मणे । च । अग्नीधे ।

ब्रह्मणे च च ब्रह्मणे ब्रह्मणे चाग्नीधे ऽग्नीधे च ब्रह्मणे ब्रह्मणे चाग्नीधे ।

(54)[P19] 7.1.5.6(46)– च । अग्नीधे । च ।

चाग्नीधे ऽग्नीधे च चाग्नीधे च चाग्नीधे च चाग्नीधे च ।

(55)[P19] 7.1.5.6(47)- अ॒ग्नीधे᳚ । च॒ । देया᳚ ।

अ॒ग्नीधे॑ च चा॒ग्नीधे॒ ऽग्नीधे॑ च॒ देया॒ देया॑ चा॒ग्नीधे॒ ऽग्नीधे॑ च॒ देया᳚ ।

(56)[P19] 7.1.5.6(47)- अ॒ग्नीधे᳚ ।

अ॒ग्नीध॒ इत्य॑ग्नि - इधे᳚ ।

(57)[P19] 7.1.5.6(48)- च॒ । देया᳚ । इति॑ ।

च॒ देया॒ देया॑ च च॒ देयेतीति॒ देया॑ च च॒ देयेति॑ ।

(58)[P19] 7.1.5.6(49)- देया᳚ । इति॑ । द्विभा॑गम् ।

देयेतीति॒ देया॒ देयेति॒ द्विभा॑ग॒म् द्विभा॑ग॒ मिति॒ देया॒ देयेति॒ द्विभा॑गम् ।

(59)[P19] 7.1.5.6(50)- इति॑ । द्विभा॑गम् । ब्र॒ह्मणे᳚ ।

इति॒ द्विभा॑ग॒म् द्विभा॑ग॒ मितीति॒ द्विभा॑गम् ब्र॒ह्मणे᳚ ब्र॒ह्मणे॒ द्विभा॑ग॒ मितीति॒ द्विभा॑गम् ब्र॒ह्मणे᳚ ।

(1)[P20] 7.1.5.7(1)- द्विभा॑गम् । ब्र॒ह्मणे᳚ । तृ॒तीय॑म् ।

द्विभा॑गम् ब्र॒ह्मणे᳚ ब्र॒ह्मणे॒ द्विभा॑ग॒म् द्विभा॑गम् ब्र॒ह्मणे॒ तृ॒तीय॒म् तृ॒तीय॑म् ब्र॒ह्मणे॒ द्विभा॑ग॒म् द्विभा॑गम् ब्र॒ह्मणे॒ तृ॒तीय॑म् ।

(2)[P20] 7.1.5.7(1)- द्विभा॑गम् ।

द्विभा॑ग॒मिति॒ द्वि - भा॒ग॒म् ।

(3)[P20] 7.1.5.7(2)- ब्र॒ह्मणे᳚ । तृ॒तीय॑म् । अ॒ग्नीधे᳚ ।

ब्र॒ह्मणे॒ तृ॒तीय॒म् तृ॒तीय॑म् ब्र॒ह्मणे᳚ ब्र॒ह्मणे॒ तृ॒तीय म॒ग्नीधे॒ ऽग्नीधे॒ तृ॒तीय॑म् ब्र॒ह्मणे᳚ ब्र॒ह्मणे॒ तृ॒तीय म॒ग्नीधे᳚ ।

(4)[P20] 7.1.5.7(3)- तृ॒तीय॑म् । अ॒ग्नीधे᳚ । ऐ॒न्द्रः ।

तृ॒तीय म॒ग्नीधे॒ ऽग्नीधे॒ तृ॒तीय॒म् तृ॒तीय म॒ग्नीध॑ ऐ॒न्द्र ऐ॒न्द्रो᳚ ऽग्नीधे॒ तृ॒तीय॒म् तृ॒तीय म॒ग्नीध॑ ऐ॒न्द्रः ।

(5)[P20] 7.1.5.7(4)- अग्नीधे । ऐन्द्रः । वै ।

अग्नीध ऐन्द्र ऐन्द्रो ऽग्नीधे ऽग्नीध ऐन्द्रो वै वा ऐन्द्रो ऽग्नीधे ऽग्नीध ऐन्द्रो वै ।

(6)[P20] 7.1.5.7(4)- अग्नीधे ।

अग्नीध इत्यग्नि - इधे ।

(7)[P20] 7.1.5.7(5)- ऐन्द्रः । वै । ब्रह्मा ।

ऐन्द्रो वै वा ऐन्द्र ऐन्द्रो वै ब्रह्मा ब्रह्मा वा ऐन्द्र ऐन्द्रो वै ब्रह्मा ।

(8)[P20] 7.1.5.7(6)- वै । ब्रह्मा । वैष्णवः ।

वै ब्रह्मा ब्रह्मा वै वै ब्रह्मा वैष्णवो वैष्णवो ब्रह्मा वै वै ब्रह्मा वैष्णवः ।

(9)[P20] 7.1.5.7(7)- ब्रह्मा । वैष्णवः । अग्नीत् ।

ब्रह्मा वैष्णवो वैष्णवो ब्रह्मा ब्रह्मा वैष्णवो ऽग्नी दग्नीद् वैष्णवो ब्रह्मा ब्रह्मा वैष्णवो ऽग्नीत् ।

(10)[P20] 7.1.5.7(8)- वैष्णवः । अग्नीत् । यथा ।

वैष्णवो ऽग्नी दग्नीद् वैष्णवो वैष्णवो ऽग्नीद् यथा यथा ऽग्नीद् वैष्णवो वैष्णवो ऽग्नीद् यथा ।

(11)[P20] 7.1.5.7(9)- अग्नीत् । यथा । एव ।

अग्नीद् यथा यथा ऽग्नी दग्नीद् यथै वैव यथा ऽग्नी दग्नीद् यथैव ।

(12)[P20] 7.1.5.7(9)- अग्नीत् ।

अग्नीदित्यग्नि - इत् ।

(13)[P20] 7.1.5.7(10)- यथा । एव । तौ ।

यथै वैव यथा यथैव तौ ता वेव यथा यथैव तौ ।

(14)[P20] 7.1.5.7(11)- एव । तौ । अकल्पेताम् ।

एव तौ ता वेवैव ता वकल्पेता मकल्पेताम् ता वेवैव ता वकल्पेताम् ।

(15)[P20] 7.1.5.7(12)– तौ । अकल्पेताम् । इति ।

ता वकल्पेता मकल्पेताम् तौ ता वकल्पेता मिती त्यकल्पेताम् तौ ता वकल्पेता मिति ।

(16)[P20] 7.1.5.7(13)– अकल्पेताम् । इति । अथ ।

अकल्पेता मिती त्यकल्पेता मकल्पेता मित्य थाथे त्यकल्पेता मकल्पेता मित्यथ ।

(17)[P20] 7.1.5.7(14)– इति । अथ । आहुः ।

इत्यथा थेती त्यथाहु राहु रथेती त्यथाहुः ।

(18)[P20] 7.1.5.7(15)– अथ । आहुः । या ।

अथाहु राहु रथा थाहुर् या या ऽऽहु रथा थाहुर् या ।

(19)[P20] 7.1.5.7(16)– आहुः । या । कल्याणी ।

आहुर् या या ऽऽहु राहुर् या कल्याणी कल्याणी या ऽऽहु राहुर् या कल्याणी ।

(20)[P20] 7.1.5.7(17)– या । कल्याणी । बहुरूपा ।

या कल्याणी कल्याणी या या कल्याणी बहुरूपा बहुरूपा कल्याणी या या कल्याणी बहुरूपा ।

(21)[P20] 7.1.5.7(18)– कल्याणी । बहुरूपा । सा ।

कल्याणी बहुरूपा बहुरूपा कल्याणी कल्याणी बहुरूपा सा सा बहुरूपा कल्याणी कल्याणी बहुरूपा सा ।

(22)[P20] 7.1.5.7(19)– बहुरूपा । सा । देया ।

बहुरूपा सा सा बहुरूपा बहुरूपा सा देया देया सा बहुरूपा बहुरूपा सा देया ।

(23)[P20] 7.1.5.7(19)– बहुरूपा ।

बहुरूपेति बहु – रूपा ।

(24)[P20] 7.1.5.7(20)– सा । देया । इति ।

सा देया देया सा सा देयेतीति देया सा सा देयेति ।

(25)[P20] 7.1.5.7(21)– देया । इति । अथ ।

देयेतीति देया देये त्यथा थेति देया देये त्यथ ।

(26)[P20] 7.1.5.7(22)– इति । अथ । आहुः ।

इत्यथा थेती त्यथाहु राहु रथेती त्यथाहुः ।

(27)[P20] 7.1.5.7(23)– अथ । आहुः । या । (GS–7.1–18)

अथाहु राहु रथा थाहुर् या या ऽऽहु रथा थाहुर् या ।

(28)[P20] 7.1.5.7(24)– आहुः । या । द्विरूपा । (GS–7.1–18)

आहुर् या या ऽऽहु राहुर् या द्विरूपा द्विरूपा या ऽऽहु राहुर् या द्विरूपा ।

(29)[P20] 7.1.5.7(25)– या । द्विरूपा । उभयतएनी । (GS–7.1–18)

या द्विरूपा द्विरूपा या या द्विरूपो भयत एन्युभयतएनी द्विरूपा या या द्विरूपो भयतएनी ।

(30)[P20] 7.1.5.7(26)– द्विरूपा । उभयतएनी । सा । (GS–7.1–18)

द्विरूपो भयत एन्युभयतएनी द्विरूपा द्विरूपो भयतएनी सा सोभयतएनी द्विरूपा द्विरूपो भयतएनी सा ।

(31)[P20] 7.1.5.7(26)– द्विरूपा । (GS–7.1–18)

द्विरूपेति द्वि – रूपा ।

(32)[P20] 7.1.5.7(27)– उभयतएनी । सा । देया । (GS–7.1–18)

उभयतएनी सा सोभयत एन्युभयतएनी सा देया देया सोभयत एन्युभयतएनी सा देया ।

(33)[P20] 7.1.5.7(27)– उभयतएनी । (GS–7.1–18)

उभयतएनीत्युभयतः – एनी ।

(34)[P20] 7.1.5.7(28)– सा । देया । इति । (GS–7.1–18)

सा देया देया सा सा देयेतीति देया सा सा देयेति ।

(35)[P20] 7.1.5.7(29)– देया । इति । सहस्रस्य ।

देयेतीति देया देयेति सहस्रस्य सहस्र स्येति देया देयेति सहस्रस्य ।

(36)[P20] 7.1.5.7(30)– इति । सहस्रस्य । परिगृहीत्यै ।

इति सहस्रस्य सहस्र स्येतीति सहस्रस्य परिगृहीत्यै परिगृहीत्यै सहस्र स्येतीति सहस्रस्य परिगृहीत्यै ।

(37)[P20] 7.1.5.7(31)– सहस्रस्य । परिगृहीत्यै । तत् ।

सहस्रस्य परिगृहीत्यै परिगृहीत्यै सहस्रस्य सहस्रस्य परिगृहीत्यै तत् तत् परिगृहीत्यै सहस्रस्य सहस्रस्य परिगृहीत्यै तत् ।

(38)[P20] 7.1.5.7(32)– परिगृहीत्यै । तत् । वै ।

परिगृहीत्यै तत् तत् परिगृहीत्यै परिगृहीत्यै तद् वै वै तत् परिगृहीत्यै परिगृहीत्यै तद् वै ।

(39)[P20] 7.1.5.7(32)– परिगृहीत्यै ।

परिगृहीत्या इति परि – गृहीत्यै ।

(40)[P20] 7.1.5.7(33)– तत् । वै । एतत् ।

तद् वै वै तत् तद् वा एत देतद् वै तत् तद् वा एतत् ।

(41)[P20] 7.1.5.7(34)– वै । एतत् । सहस्रस्य ।

वा एत देतद् वै वा एतथ् सहस्रस्य सहस्र स्यैतद् वै वा एतथ् सहस्रस्य ।

(42)[P20] 7.1.5.7(35)– एतत् । सहस्रस्य । अयनम् ।

एतथ् सहस्रस्य सहस्र स्यैत देतथ् सहस्रस्यायन मयन(ग्म्) सहस्र स्यैत देतथ् सहस्रस्यायनम् ।

(43)[P20] 7.1.5.7(36)– स॒ह॒स्र॑स्य । अय॑नम् । स॒ह॒स्र᳚म् ।

स॒ह॒स्र॑स्या॒ यन॒ मय॑न(ग्म्) स॒ह॒स्र॑स्य स॒ह॒स्र॒ स्याय॑न(ग्म्) स॒ह॒स्र(ग्म्)॑ स॒ह॒स्र॒ मय॑न(ग्म्) स॒ह॒स्र॑स्य स॒ह॒स्र॒ स्याय॑न(ग्म्) स॒ह॒स्र᳚म् ।

(44)[P20] 7.1.5.7(37)– अय॑नम् । स॒ह॒स्र᳚म् । स्तो॒त्रीया᳚: ।

अय॑न(ग्म्) स॒ह॒स्र(ग्म्)॑ स॒ह॒स्र॒ मय॒न॒ मय॑न(ग्म्) स॒ह॒स्र(गग्)॑ स्तो॒त्रीया᳚: स्तो॒त्रीया᳚: स॒ह॒स्र॒ मय॒न॒ मय॑न(ग्म्) स॒ह॒स्र(गग्)॑ स्तो॒त्रीया᳚: ।

(45)[P20] 7.1.5.7(38)– स॒ह॒स्र᳚म् । स्तो॒त्रीया᳚: । स॒ह॒स्र᳚म् ।

स॒ह॒स्र(गग्)॑ स्तो॒त्रीया᳚: स्तो॒त्रीया᳚: स॒ह॒स्र(ग्म्)॑ स॒ह॒स्र(गग्)॑ स्तो॒त्रीया᳚: स॒ह॒स्र(ग्म्)॑ स॒ह॒स्र(गग्)॑ स्तो॒त्रीया᳚: स॒ह॒स्र(ग्म्)॑ स॒ह॒स्र(गग्)॑ स्तो॒त्रीया᳚: स॒ह॒स्र᳚म् ।

(46)[P20] 7.1.5.7(39)– स्तो॒त्रीया᳚: । स॒ह॒स्र᳚म् । दक्षि॑णाः ।

स्तो॒त्रीया᳚: स॒ह॒स्र(ग्म्)॑ स॒ह॒स्र(गग्)॑ स्तो॒त्रीया᳚: स्तो॒त्रीया᳚: स॒ह॒स्रम् दक्षि॑णा॒ दक्षि॑णाः स॒ह॒स्र(गग्)॑ स्तो॒त्रीया᳚: स्तो॒त्रीया᳚: स॒ह॒स्रम् दक्षि॑णाः ।

(47)[P20] 7.1.5.7(40)– स॒ह॒स्र᳚म् । दक्षि॑णाः । स॒ह॒स्र॑सम्मितः ।

स॒ह॒स्रम् दक्षि॑णा॒ दक्षि॑णाः स॒ह॒स्र(ग्म्)॑ स॒ह॒स्रम् दक्षि॑णाः स॒ह॒स्र॑सम्मितः स॒ह॒स्र॑सम्मितो॒ दक्षि॑णाः स॒ह॒स्र(ग्म्)॑ स॒ह॒स्रम् दक्षि॑णाः स॒ह॒स्र॑सम्मितः ।

(48)[P20] 7.1.5.7(41)– दक्षि॑णाः । स॒ह॒स्र॑सम्मितः । सु॒व॒र्गः ।

दक्षि॑णाः स॒ह॒स्र॑सम्मितः स॒ह॒स्र॑सम्मितो॒ दक्षि॑णा॒ दक्षि॑णाः स॒ह॒स्र॑सम्मितः सु॒व॒र्गः सु॒व॒र्गः स॒ह॒स्र॑सम्मितो॒ दक्षि॑णा॒ दक्षि॑णाः स॒ह॒स्र॑सम्मितः सु॒व॒र्गः ।

(49)[P20] 7.1.5.7(42)– स॒ह॒स्र॑सम्मितः । सु॒व॒र्गः । लो॒कः ।

स॒ह॒स्र॑सम्मितः सु॒व॒र्गः सु॒व॒र्गः स॒ह॒स्र॑सम्मितः स॒ह॒स्र॑सम्मितः सु॒व॒र्गो लो॒को लो॒कः सु॒व॒र्गः स॒ह॒स्र॑सम्मितः स॒ह॒स्र॑सम्मितः सु॒व॒र्गो लो॒कः ।

(50)[P20] 7.1.5.7(42)- सहस्रसम्मितः ।

सहस्रसम्मित इति सहस्र - सम्मितः ।

(51)[P20] 7.1.5.7(43)- सुवर्गः । लोकः । सुवर्गस्य ।

सुवर्गो लोको लोकः सुवर्गः सुवर्गो लोकः सुवर्गस्य सुवर्गस्य लोकः सुवर्गः सुवर्गो लोकः सुवर्गस्य ।

(52)[P20] 7.1.5.7(43)- सुवर्गः ।

सुवर्ग इति सुवः - गः ।

(53)[P20] 7.1.5.7(44)- लोकः । सुवर्गस्य । लोकस्य ।

लोकः सुवर्गस्य सुवर्गस्य लोको लोकः सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य लोको लोकः सुवर्गस्य लोकस्य ।

(54)[P20] 7.1.5.7(45)- सुवर्गस्य । लोकस्य । अभिजित्यै ॥

सुवर्गस्य लोकस्य लोकस्य सुवर्गस्य सुवर्गस्य लोकस्या भिजित्या अभिजित्यै लोकस्य सुवर्गस्य सुवर्गस्य लोकस्या भिजित्यै ।

(55)[P20] 7.1.5.7(45)- सुवर्गस्य ।

सुवर्गस्येति सुवः - गस्य ।

(56)[P20] 7.1.5.7(46)- लोकस्य । अभिजित्यै ॥

लोकस्या भिजित्या अभिजित्यै लोकस्य लोकस्या भिजित्यै ।

(57)[P20] 7.1.5.7(47)- अभिजित्यै ॥

अभिजित्या इत्यभि - जित्यै ।

========

## 7.1.6अनुवाकम् 6 – घनम्

(1)[P21] 7.1.6.1(1)– सोमः । वै । सहस्रम् ।

सोमो वै वै सोमः सोमो वै सहस्र(ग्म्) सहस्रं वै सोमः सोमो वै सहस्रम् ।

(2)[P21] 7.1.6.1(2)– वै । सहस्रम् । अविन्दत् ।

वै सहस्र(ग्म्) सहस्रं वै वै सहस्र मविन्द दविन्दथ् सहस्रं वै वै सहस्र मविन्दत् ।

(3)[P21] 7.1.6.1(3)– सहस्रम् । अविन्दत् । तम् ।

सहस्र मविन्द दविन्दथ् सहस्र(ग्म्) सहस्र मविन्दत् तम् त मविन्दथ् सहस्र(ग्म्) सहस्र मविन्दत् तम् ।

(4)[P21] 7.1.6.1(4)– अविन्दत् । तम् । इन्द्रः ।

अविन्दत् तम् त मविन्द दविन्दत् त मिन्द्र इन्द्र स्त मविन्द दविन्दत् त मिन्द्रः ।

(5)[P21] 7.1.6.1(5)– तम् । इन्द्रः । अनु ।

त मिन्द्र इन्द्र स्तम् त मिन्द्रो ऽन्वन् विन्द्र स्तम् त मिन्द्रो ऽनु ।

(6)[P21] 7.1.6.1(6)– इन्द्रः । अनु । अन्विन्दत् ।

इन्द्रो ऽन्वन् विन्द्र इन्द्रो ऽन्वन्विन्द दन्विन्द दन्विन्द्र इन्द्रो ऽन्वन्विन्दत् ।

(7)[P21] 7.1.6.1(7)– अनु । अन्विन्दत् । तौ ।

अन्वन्विन्द दन्विन्द दन्वन् वन्विन्दत् तौ ता वन्विन्द दन्वन् वन्विन्दत् तौ ।

(8)[P21] 7.1.6.1(8)– अन्विन्दत् । तौ । यमः ।

अन्विन्दत् तौ ता वन्विन्द दन्विन्दत् तौ यमो यम स्ता वन्विन्द दन्विन्दत् तौ यमः ।

(9)[P21] 7.1.6.1(9)– तौ । यमः । न्यागच्छत् ।

तौ यमो यम स्तौ तौ यमो न्यागच्छन् न्यागच्छद् यम स्तौ तौ यमो न्यागच्छत् ।

(10)[P21] 7.1.6.1(10)- य॒मः । न्याग॑च्छत् । तौ ।

य॒मो न्याग॑च्छ॒न् न्याग॑च्छद् य॒मो य॒मो न्याग॑च्छ॒त् तौ तौ न्याग॑च्छद् य॒मो य॒मो न्याग॑च्छ॒त् तौ ।

(11)[P21] 7.1.6.1(11)- न्याग॑च्छत् । तौ । अ॒ब्र॒वी॒त् ।

न्याग॑च्छ॒त् तौ तौ न्याग॑च्छ॒न् न्याग॑च्छ॒त् ता व॑ब्रवी दब्रवी॒त् तौ न्याग॑च्छ॒न् न्याग॑च्छ॒त् ता व॑ब्रवीत् ।

(12)[P21] 7.1.6.1(11)- न्याग॑च्छत् ।

न्याग॑च्छ॒दिति॑ नि - आग॑च्छत् ।

(13)[P21] 7.1.6.1(12)- तौ । अ॒ब्र॒वी॒त् । अ॒स्तु॑ । (GS-7.1-19)

ता व॑ब्रवी दब्रवी॒त् तौ ता व॑ब्रवी॒ दस्त्व स्त्व॑ब्रवी॒त् तौ ता व॑ब्रवी॒ दस्तु॑ ।

(14)[P21] 7.1.6.1(13)- अ॒ब्र॒वी॒त् । अस्तु॑ । मे॒ । (GS-7.1-19)

अ॒ब्र॒वी॒ दस्त्व स्त्व॑ब्रवी दब्रवी॒ दस्तु॑ मे मे॒ अस्त्व॑ब्रवी दब्रवी॒ दस्तु॑ मे ।

(15)[P21] 7.1.6.1(14)- अस्तु॑ । मे॒ । अत्र॑ । (GS-7.1-19)

अस्तु॑ मे मे॒ अस्त्वस्तु॒ मे ऽत्रात्र॑ मे॒ अस्त्वस्तु॒ मे ऽत्र॑ ।

(16)[P21] 7.1.6.1(15)- मे॒ । अत्र॑ । अपि॑ । (GS-7.1-19)

मे ऽत्रात्र॑ मे॒ मे ऽत्राप्य प्यत्र॑ मे॒ मे ऽत्रापि॑ ।

(17)[P21] 7.1.6.1(16)- अत्र॑ । अपि॑ । इति॑ । (GS-7.1-19)

अत्राप्य प्यत्रा त्रापीती त्यप्य त्रात्रा पीति॑ ।

(18)[P21] 7.1.6.1(17)- अपि॑ । इति॑ । अ॒स्तु॑ । (GS-7.1-19)

अपीती त्यप्य पीत्य स्त्व स्त्वित्य प्यपी त्यस्तु॑ ।

(19)[P21] 7.1.6.1(18)- इति॑ । अस्तु॑ । ही(3) । (GS-7.1-19)

इत्यस्त्व स्त्विती त्यस्तु॒ ही(3) ही(3) अ॑स्त्विती त्यस्तु॒ ही(3) ।

(20)[P21] 7.1.6.1(19)– अस्तु । ही(3) । इति । (GS–7.1–19)

अस्तु ही(3) हि(3) अस्त्वस्तु ही(3) इतीति ही(3) अस्त्वस्तु ही(3) इति ।

(21)[P21] 7.1.6.1(20)– ही(3) । इति । अब्रूताम् । (GS–7.1–19)

ही(3) इतीति ही(3) ही(3) इत्यब्रूता मब्रूता मिति ही(3) ही(3) इत्यब्रूताम् ।

(22)[P21] 7.1.6.1(21)– इति । अब्रूताम् । सः । (GS–7.1–19)

इत्यब्रूता मब्रूता मिती त्यब्रूता(ग्म्) स सो ऽब्रूता मिती त्यब्रूता(ग्म्) सः ।

(23)[P21] 7.1.6.1(22)– अब्रूताम् । सः । यमः । (GS–7.1–19)

अब्रूता(ग्म्) स सो ऽब्रूता मब्रूता(ग्म्) स यमो यमः सो ऽब्रूता मब्रूता(ग्म्) स यमः ।

(24)[P21] 7.1.6.1(23)– सः । यमः । एकस्याम् ।

स यमो यमः स स यम एकस्या मेकस्यां ँयमः स स यम एकस्याम् ।

(25)[P21] 7.1.6.1(24)– यमः । एकस्याम् । वीर्यम् ।

यम एकस्या मेकस्यां ँयमो यम एकस्यां ँवीर्यं ँवीर्य मेकस्यां ँयमो यम एकस्यां ँवीर्यम् ।

(26)[P21] 7.1.6.1(25)– एकस्याम् । वीर्यम् । परि ।

एकस्यां ँवीर्यं ँवीर्य मेकस्या मेकस्यां ँवीर्यम् परि परि वीर्य मेकस्या मेकस्यां ँवीर्यम् परि ।

(27)[P21] 7.1.6.1(26)– वीर्यम् । परि । अपश्यत् ।

वीर्यम् परि परि वीर्यं ँवीर्यम् पर्यपश्य दपश्यत् परि वीर्यं ँवीर्यम् पर्यपश्यत् ।

(28)[P21] 7.1.6.1(27)– परि । अपश्यत् । इयम् ।

पर्यपश्य दपश्यत् परि पर्यपश्य दिय मिय मपश्यत् परि पर्यपश्य दियम् ।

(29)[P21] 7.1.6.1(28)– अपश्यत् । इयम् । वै ।

अपश्य दिय मिय मपश्य दपश्य दियं ँवै वा इय मपश्य दपश्य दियं ँवै ।

(30)[P21] 7.1.6.1(29)- इयम् । वै । अस्य । (GS-7.1-20)

इयं ँवै वा इय मियं ँवा अस्यास्य वा इय मियं ँवा अस्य ।

(31)[P21] 7.1.6.1(30)- वै । अस्य । सहस्रस्य । (GS-7.1-20)

वा अस्यास्य वै वा अस्य सहस्रस्य सहस्र स्यास्य वै वा अस्य सहस्रस्य ।

(32)[P21] 7.1.6.1(31)- अस्य । सहस्रस्य । वीर्यम् । (GS-7.1-20)

अस्य सहस्रस्य सहस्रस्या स्यास्य सहस्रस्य वीर्यं ँवीर्य(ग्म्) सहस्रस्या स्यास्य सहस्रस्य वीर्यम् ।

(33)[P21] 7.1.6.1(32)- सहस्रस्य । वीर्यम् । बिभर्ति । (GS-7.1-20)

सहस्रस्य वीर्यं ँवीर्य(ग्म्) सहस्रस्य सहस्रस्य वीर्यम् बिभर्ति बिभर्ति वीर्य(ग्म्) सहस्रस्य सहस्रस्य वीर्यम् बिभर्ति ।

(34)[P21] 7.1.6.1(33)- वीर्यम् । बिभर्ति । इति । (GS-7.1-20)

वीर्यम् बिभर्ति बिभर्ति वीर्यं ँवीर्यम् बिभर्ती तीति बिभर्ति वीर्यं ँवीर्यम् बिभर्तीति ।

(35)[P21] 7.1.6.1(34)- बिभर्ति । इति । तौ । (GS-7.1-20)

बिभर्ती तीति बिभर्ति बिभर्तीति तौ ता विति बिभर्ति बिभर्तीति तौ ।

(36)[P21] 7.1.6.1(35)- इति । तौ । अब्रवीत् । (GS-7.1-20)

इति तौ ता वितीति ता वब्रवी दब्रवीत् ता वितीति ता वब्रवीत् ।

(37)[P21] 7.1.6.1(36)- तौ । अब्रवीत् । इयम् ।

ता वब्रवी दब्रवीत् तौ ता वब्रवी दियं मिय मब्रवीत् तौ ता वब्रवी दियम् ।

(38)[P21] 7.1.6.1(37)- अब्रवीत् । इयम् । मम ।

अब्रवी दिय मिय मब्रवी दब्रवी दियम् मम ममेय मब्रवी दब्रवी दियम् मम ।

(39)[P21] 7.1.6.1(38)– इ॒यम् । मम॑ । अ॒स्तु॒ ।

इ॒यम् मम॒ ममे॒य मि॒यम् ममा॑ स्त्वस्तु॒ ममे॒य मि॒यम् ममा॑स्तु ।

(40)[P21] 7.1.6.1(39)– मम॑ । अ॒स्तु॒ । ए॒तत् ।

ममा स्त्वस्तु॒ मम॒ ममा स्त्वे॒त दे॒त दस्तु॒ मम॒ ममा स्त्वे॒तत् ।

(41)[P21] 7.1.6.1(40)– अ॒स्तु॒ । ए॒तत् । यु॒वयोः᳚ ।

अस्त्वे॒त दे॒त दस्त्व स्त्वे॒तद् यु॒वयो॒र् यु॒वयो॑ रे॒त दस्त्व स्त्वे॒तद् यु॒वयोः᳚ ।

(42)[P21] 7.1.6.1(41)– ए॒तत् । यु॒वयोः᳚ । इति॑ ।

ए॒तद् यु॒वयो॒र् यु॒वयो॑ रे॒त दे॒तद् यु॒वयो॒ रितीति॑ यु॒वयो॑ रे॒त दे॒तद् यु॒वयो॒ रिति॑ ।

(43)[P21] 7.1.6.1(42)– यु॒वयोः᳚ । इति॑ । तौ ।

यु॒वयो॒ रितीति॑ यु॒वयो॒र् यु॒वयो॒ रिति॒ तौ ता विति॑ यु॒वयो॒र् यु॒वयो॒ रिति॒ तौ ।

(44)[P21] 7.1.6.1(43)– इति॑ । तौ । अ॒ब्रू॒ता॒म् ।

इति॒ तौ ता विती॒ति॒ ता व॑ब्रूता मब्रू॒ताम् ता विती॒ति॒ ता व॑ब्रूताम् ।

(45)[P21] 7.1.6.1(44)– तौ । अ॒ब्रू॒ता॒म् । सर्वे᳚ ।

ता व॑ब्रूता मब्रू॒ता॒म् तौ ता व॑ब्रू॒ता॒(ग्म्) सर्वे॒ सर्वे᳚ ऽब्रू॒ता॒म् तौ ता व॑ब्रू॒ता॒(ग्म्) सर्वे᳚ ।

(46)[P21] 7.1.6.1(45)– अ॒ब्रू॒ता॒म् । सर्वे᳚ । वै । (JM–24,JD–11)

अ॒ब्रू॒ता॒(ग्म्) सर्वे॒ सर्वे᳚ ऽब्रूता मब्रू॒ता॒(ग्म्) सर्वे॒ वै वै सर्वे᳚ ऽब्रूता मब्रू॒ता॒(ग्म्) सर्वे॒ वै ।

(47)[P21] 7.1.6.1(46)– सर्वे᳚ । वै । ए॒तत् । (JM–24,JD–11)

सर्वे॒ वै वै सर्वे॒ सर्वे॒ वा ए॒त दे॒तद् वै सर्वे॒ सर्वे॒ वा ए॒तत् ।

(48)[P21] 7.1.6.1(47)– वै । ए॒तत् । ए॒तस्या᳚म् ।

वा ए॒त दे॒तद् वै वा ए॒त दे॒तस्या॑ मे॒तस्या॑ मे॒तद् वै वा ए॒त दे॒तस्या᳚म् ।

(49)[P21] 7.1.6.1(48)- एतत् । एतस्याम् । वीर्यम् ।

एत देतस्या मेतस्या मेत देत देतस्यां ँवीर्यं ँवीर्य मेतस्या मेत देत देतस्यां ँवीर्यम् ।

(50)[P21] 7.1.6.1(49)- एतस्याम् । वीर्यम् । परि ।

एतस्यां ँवीर्यं ँवीर्य मेतस्या मेतस्यां ँवीर्यम् परि परि वीर्य मेतस्या मेतस्यां ँवीर्यम् परि ।

(51)[P21] 7.1.6.1(50)- वीर्यम् । परि । पश्यामः ।

वीर्यम् परि परि वीर्यं ँवीर्यम् परि पश्यामः पश्यामः परि वीर्यं ँवीर्यम् परि पश्यामः ।

(1)[P22] 7.1.6.2(1)- परि । पश्यामः । अ(ग्म्)शम् ।

परि पश्यामः पश्यामः परि परि पश्यामो ऽ(ग्म्)श म(ग्म्)शम् पश्यामः परि परि पश्यामो ऽ(ग्म्)शम् ।

(2)[P22] 7.1.6.2(2)- पश्यामः । अ(ग्म्)शम् । आ ।

पश्यामो ऽ(ग्म्)श म(ग्म्)शम् पश्यामः पश्यामो ऽ(ग्म्)श मा ऽ(ग्म्)शम् पश्यामः पश्यामो ऽ(ग्म्)श मा ।

(3)[P22] 7.1.6.2(3)- अ(ग्म्)शम् । आ । हरामहै ।

अ(ग्म्)श मा ऽ(ग्म्)श म(ग्म्)श मा हरामहै हरामहा आ ऽ(ग्म्)श म(ग्म्)श मा हरामहै ।

(4)[P22] 7.1.6.2(4)- आ । हरामहै । इति ।

आ हरामहै हरामहा आ हरामहा इतीति हरामहा आ हरामहा इति ।

(5)[P22] 7.1.6.2(5)- हरामहै । इति । तस्याम् ।

हरामहा इतीति हरामहै हरामहा इति तस्याम् तस्या मिति हरामहै हरामहा इति तस्याम् ।

(6)[P22] 7.1.6.2(6)- इति । तस्याम् । अ(ग्म्)शम् ।

इति तस्याम् तस्या मितीति तस्या म(ग्म्)श म(ग्म्)शम् तस्या मितीति तस्या म(ग्म्)शम् ।

(7)[P22] 7.1.6.2(7)– तस्याम् । अ(ग्म्)शम् । आ ।

तस्या म(ग्म्)श म(ग्म्)शम् तस्याम् तस्या म(ग्म्)श मा ऽ(ग्म्)शम् तस्याम् तस्या म(ग्म्)श मा ।

(8)[P22] 7.1.6.2(8)– अ(ग्म्)शम् । आ । अहरन्त ।

अ(ग्म्)श मा ऽ(ग्म्)श म(ग्म्)श मा ऽहरन्ता हरन्ता ऽ(ग्म्)श म(ग्म्)श मा ऽहरन्त ।

(9)[P22] 7.1.6.2(9)– आ । अहरन्त । ताम् ।

आ ऽहरन्ता हरन्ता ऽहरन्त ताम् ता महरन्ता ऽहरन्त ताम् ।

(10)[P22] 7.1.6.2(10)– अहरन्त । ताम् । अफ्सु ।

अहरन्त ताम् ता महरन्ता हरन्त ता मफ्स्वफ्सु ता महरन्ता हरन्त ता मफ्सु ।

(11)[P22] 7.1.6.2(11)– ताम् । अफ्सु । प्र ।

ता मफ्स्वफ्सु ताम् ता मफ्सु प्र प्राफ्सु ताम् ता मफ्सु प्र ।

(12)[P22] 7.1.6.2(12)– अफ्सु । प्र । अवेशयन्न् ।

अफ्सु प्र प्राफ्स्वफ्सु प्रावेशयन् नवेशयन् प्राफ्स्वफ्सु प्रावेशयन्न् ।

(13)[P22] 7.1.6.2(12)– अफ्सु ।

अफ्स्वित्यप् – सु ।

(14)[P22] 7.1.6.2(13)– प्र । अवेशयन्न् । सोमाय ।

प्रावेशयन् नवेशयन् प्र प्रावेशयन् थ्सोमाय सोमाया वेशयन् प्र प्रावेशयन् थ्सोमाय ।

(15)[P22] 7.1.6.2(14)– अवेशयन्न् । सोमाय । उदेहि ।

अवेशयन् थ्सोमाय सोमाया वेशयन् नवेशयन् थ्सोमायो देह्यु देहि सोमाया वेशयन् नवेशयन् थ्सोमायोदेहि ।

(16)[P22] 7.1.6.2(15)- सोमाय । उदेहि । इति ।

सोमायो देह्यु देहि सोमाय सोमायो देहीती त्युदेहि सोमाय सोमायो देहीति ।

(17)[P22] 7.1.6.2(16)- उदेहि । इति । सा ।

उदेहीती त्युदे ह्युदेहीति सा सेत्युदे ह्युदेहीति सा ।

(18)[P22] 7.1.6.2(16)- उदेहि ।

उदेहीत्युत् - एहि ।

(19)[P22] 7.1.6.2(17)- इति । सा । रोहिणी ।

इति सा सेतीति सा रोहिणी रोहिणी सेतीति सा रोहिणी ।

(20)[P22] 7.1.6.2(18)- सा । रोहिणी । पिङ्गला ।

सा रोहिणी रोहिणी सा सा रोहिणी पिङ्गला पिङ्गला रोहिणी सा सा रोहिणी पिङ्गला ।

(21)[P22] 7.1.6.2(19)- रोहिणी । पिङ्गला । एकहायनी ।

रोहिणी पिङ्गला पिङ्गला रोहिणी रोहिणी पिङ्ग लैकहाय न्येकहायनी पिङ्गला रोहिणी रोहिणी पिङ्ग लैकहायनी ।

(22)[P22] 7.1.6.2(20)- पिङ्गला । एकहायनी । रूपम् ।

पिङ्ग लैकहाय न्येकहायनी पिङ्गला पिङ्ग लैकहायनी रूप(ग्म्) रूप मेकहायनी पिङ्गला पिङ्ग लैकहायनी रूपम् ।

(23)[P22] 7.1.6.2(21)- एकहायनी । रूपम् । कृत्वा ।

एकहायनी रूप(ग्म्) रूप मेकहाय न्येकहायनी रूपम् कृत्वा कृत्वा रूप मेकहाय न्येकहायनी रूपम् कृत्वा ।

(24)[P22] 7.1.6.2(21)- एकहायनी ।

एकहायनीत्येक - हायनी ।

(25)[P22] 7.1.6.2(22)– रूपम् । कृत्वा । त्रयस्त्रि(ग्म्)शता ।

रूपम् कृत्वा कृत्वा रूप(ग्म्) रूपम् कृत्वा त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता कृत्वा रूप(ग्म्) रूपम् कृत्वा त्रयस्त्रि(ग्म्)शता ।

(26)[P22] 7.1.6.2(23)– कृत्वा । त्रयस्त्रि(ग्म्)शता । च ।

कृत्वा त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता कृत्वा कृत्वा त्रयस्त्रि(ग्म्)शता च च त्रयस्त्रि(ग्म्)शता कृत्वा कृत्वा त्रयस्त्रि(ग्म्)शता च ।

(27)[P22] 7.1.6.2(24)– त्रयस्त्रि(ग्म्)शता । च । त्रिभिः ।

त्रयस्त्रि(ग्म्)शता च च त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता च त्रिभि स्त्रिभि श्च त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता च त्रिभिः ।

(28)[P22] 7.1.6.2(24)– त्रयस्त्रि(ग्म्)शता ।

त्रयस्त्रि(ग्म्)शतेति त्रयः – त्रि(ग्म्)शता ।

(29)[P22] 7.1.6.2(25)– च । त्रिभिः । च ।

च त्रिभि स्त्रिभि श्च च त्रिभि श्च च त्रिभिश्च च त्रिभि श्च ।

(30)[P22] 7.1.6.2(26)– त्रिभिः । च । शतैः ।

त्रिभि श्च च त्रिभि स्त्रिभि श्च शतैः शतै श्च त्रिभि स्त्रिभि श्च शतैः ।

(31)[P22] 7.1.6.2(26)– त्रिभिः ।

त्रिभिरिति त्रि – भिः ।

(32)[P22] 7.1.6.2(27)– च । शतैः । सह ।

च शतैः शतै श्च च शतैः सह सह शतै श्च च शतैः सह ।

(33)[P22] 7.1.6.2(28)– शतैः । सह । उदैत् ।

शतैः सह सह शतैः शतैः सहोदै दुदैथ् सह शतैः शतैः सहोदैत् ।

(34)[P22] 7.1.6.2(29)- सह । उदैत् । तस्मात् ।

सहोदै दुदैथ् सह सहोदैत् तस्मात् तस्मा दुदैथ् सह सहोदैत् तस्मात् ।

(35)[P22] 7.1.6.2(30)- उदैत् । तस्मात् । रोहिण्या ।

उदैत् तस्मात् तस्मा दुदै दुदैत् तस्माद् रोहिण्या रोहिण्या तस्मा दुदै दुदैत् तस्माद् रोहिण्या ।

(36)[P22] 7.1.6.2(30)- उदैत् ।

उदैदित्युत् - ऐत् ।

(37)[P22] 7.1.6.2(31)- तस्मात् । रोहिण्या । पिङ्गलया ।

तस्माद् रोहिण्या रोहिण्या तस्मात् तस्माद् रोहिण्या पिङ्गलया पिङ्गलया रोहिण्या तस्मात् तस्माद् रोहिण्या पिङ्गलया ।

(38)[P22] 7.1.6.2(32)- रोहिण्या । पिङ्गलया । एकहायन्या ।

रोहिण्या पिङ्गलया पिङ्गलया रोहिण्या रोहिण्या पिङ्गल यैकहाय न्यैकहायन्या पिङ्गलया रोहिण्या रोहिण्या पिङ्गल यैकहायन्या ।

(39)[P22] 7.1.6.2(33)- पिङ्गलया । एकहायन्या । सोमम् ।

पिङ्गल यैकहाय न्यैकहायन्या पिङ्गलया पिङ्गल यैकहायन्या सोम(ग्म्) सोम मेकहायन्या पिङ्गलया पिङ्गल यैकहायन्या सोमम् ।

(40)[P22] 7.1.6.2(34)- एकहायन्या । सोमम् । क्रीणीयात् ।

एकहायन्या सोम(ग्म्) सोम मेकहाय न्यैकहायन्या सोमम् क्रीणीयात् क्रीणीयाथ् सोम मेकहाय न्यैकहायन्या सोमम् क्रीणीयात् ।

(41)[P22] 7.1.6.2(34)- एकहायन्या ।

एकहायन्येत्येक - हायन्या ।

(42)[P22] 7.1.6.2(35)- सोमम् । क्रीणीयात् । यः ।

सोमम् क्रीणीयात् क्रीणीयाथ् सोम(ग्म्) सोमम् क्रीणीयाद् यो यः क्रीणीयाथ् सोम(ग्म्) सोमम् क्रीणीयाद् यः ।

(43)[P22] 7.1.6.2(36)- क्रीणीयात् । यः । एवम् ।

क्रीणीयाद् यो यः क्रीणीयात् क्रीणीयाद् य एव मेवं ँयः क्रीणीयात् क्रीणीयाद् य एवम् ।

(44)[P22] 7.1.6.2(37)- यः । एवम् । विद्वान् ।

य एव मेवं ँयो य एवं ँविद्वान्. विद्वा नेवं ँयो य एवं ँविद्वान् ।

(45)[P22] 7.1.6.2(38)- एवम् । विद्वान् । रोहिण्या ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् रोहिण्या रोहिण्या विद्वा नेव मेवं ँविद्वान् रोहिण्या ।

(46)[P22] 7.1.6.2(39)- विद्वान् । रोहिण्या । पिङ्गलया ।

विद्वान् रोहिण्या रोहिण्या विद्वान्. विद्वान् रोहिण्या पिङ्गलया पिङ्गलया रोहिण्या विद्वान्. विद्वान् रोहिण्या पिङ्गलया ।

(47)[P22] 7.1.6.2(40)- रोहिण्या । पिङ्गलया । एकहायन्या ।

रोहिण्या पिङ्गलया पिङ्गलया रोहिण्या रोहिण्या पिङ्गल यैकहाय न्यैकहायन्या पिङ्गलया रोहिण्या रोहिण्या पिङ्गल यैकहायन्या ।

(48)[P22] 7.1.6.2(41)- पिङ्गलया । एकहायन्या । सोमम् ।

पिङ्गल यैकहाय न्यैकहायन्या पिङ्गलया पिङ्गल यैकहायन्या सोम(ग्म्) सोम मेकहायन्या पिङ्गलया पिङ्गल यैकहायन्या सोमम् ।

(49)[P22] 7.1.6.2(42)- एकहायन्या । सोमम् । क्रीणाति ।

एकहायन्या सोम(ग्म्) सोम मेकहाय न्यैकहायन्या सोमम् क्रीणाति क्रीणाति सोम मेकहाय न्यैकहायन्या सोमम् क्रीणाति ।

(50)[P22] 7.1.6.2(42)- एकहायन्या ।

एकहायन्येत्येक - हायन्या ।

(51)[P22] 7.1.6.2(43)- सोमम् । क्रीणाति । त्रयस्त्रि(ग्म्)शता ।

सोमम् क्रीणाति क्रीणाति सोम(ग्म्) सोमम् क्रीणाति त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता क्रीणाति सोम(ग्म्) सोमम् क्रीणाति त्रयस्त्रि(ग्म्)शता ।

(52)[P22] 7.1.6.2(44)- क्रीणाति । त्रयस्त्रि(ग्म्)शता । च ।

क्रीणाति त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता क्रीणाति क्रीणाति त्रयस्त्रि(ग्म्)शता च च त्रयस्त्रि(ग्म्)शता क्रीणाति क्रीणाति त्रयस्त्रि(ग्म्)शता च ।

(53)[P22] 7.1.6.2(45)- त्रयस्त्रि(ग्म्)शता । च । एव ।

त्रयस्त्रि(ग्म्)शता च च त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता चैवैव च त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता चैव ।

(54)[P22] 7.1.6.2(45)- त्रयस्त्रि(ग्म्)शता ।

त्रयस्त्रि(ग्म्)शतेति त्रयः - त्रि(ग्म्)शता ।

(55)[P22] 7.1.6.2(46)- च । एव । अस्य ।

चैवैव च चैवास्या स्यैव च चैवास्य ।

(56)[P22] 7.1.6.2(47)- एव । अस्य । त्रिभिः ।

एवास्या स्यैवै वास्य त्रिभि स्त्रिभि रस्यैवै वास्य त्रिभिः ।

(57)[P22] 7.1.6.2(48)- अस्य । त्रिभिः । च ।

अस्य त्रिभि स्त्रिभि रस्यास्य त्रिभि श्च च त्रिभि रस्यास्य त्रिभि श्च ।

(58)[P22] 7.1.6.2(49)- त्रिभिः । च । शतैः ।

त्रिभि श्च च त्रिभि स्त्रिभि श्च शतैः शतै श्च त्रिभि स्त्रिभि श्च शतैः ।

(59)[P22] 7.1.6.2(49)– त्रिभिः ।

त्रिभिरिति त्रि – भिः ।

(60)[P22] 7.1.6.2(50)– च । शतैः । सोमः ।

च शतैः शतै श्च च शतैः सोमः सोमः शतै श्च च शतैः सोमः ।

(1)[P23] 7.1.6.3(1)– शतैः । सोमः । क्रीतः ।

शतैः सोमः सोमः शतैः शतैः सोमः क्रीतः क्रीतः सोमः शतैः शतैः सोमः क्रीतः ।

(2)[P23] 7.1.6.3(2)– सोमः । क्रीतः । भवति ।

सोमः क्रीतः क्रीतः सोमः सोमः क्रीतो भवति भवति क्रीतः सोमः सोमः क्रीतो भवति ।

(3)[P23] 7.1.6.3(3)– क्रीतः । भवति । सुक्रीतेन ।

क्रीतो भवति भवति क्रीतः क्रीतो भवति सुक्रीतेन सुक्रीतेन भवति क्रीतः क्रीतो भवति सुक्रीतेन ।

(4)[P23] 7.1.6.3(4)– भवति । सुक्रीतेन । यजते ।

भवति सुक्रीतेन सुक्रीतेन भवति भवति सुक्रीतेन यजते यजते सुक्रीतेन भवति भवति सुक्रीतेन यजते ।

(5)[P23] 7.1.6.3(5)– सुक्रीतेन । यजते । ताम् ।

सुक्रीतेन यजते यजते सुक्रीतेन सुक्रीतेन यजते ताम् तां ँयजते सुक्रीतेन सुक्रीतेन यजते ताम् ।

(6)[P23] 7.1.6.3(5)– सुक्रीतेन ।

सुक्रीतेनेति सु – क्रीतेन ।

(7)[P23] 7.1.6.3(6)– यजते । ताम् । अफ्सु ।

यजते ताम् तां ँयजते यजते ता मफ्स्वफ्सु तां ँयजते यजते ता मफ्सु ।

(8)[P23] 7.1.6.3(7)– ताम् । अप्सु । प्र ।

ता मप्स्वप्सु ताम् ता मप्सु प्र प्राप्सु ताम् ता मप्सु प्र ।

(9)[P23] 7.1.6.3(8)– अप्सु । प्र । अवेशयन्न् ।

अप्सु प्र प्रा फ्स्वप्सु प्रा वेशयन् नवेशयन् प्रा फ्स्वप्सु प्रा वेशयन्न् ।

(10)[P23] 7.1.6.3(8)– अप्सु ।

अप्स्वित्यप् – सु ।

(11)[P23] 7.1.6.3(9)– प्र । अवेशयन्न् । इन्द्राय ।

प्रा वेशयन् नवेशयन् प्र प्रा वेशयन् निन्द्रा येन्द्राया वेशयन् प्र प्रा वेशयन् निन्द्राय ।

(12)[P23] 7.1.6.3(10)– अवेशयन्न् । इन्द्राय । उदेहि ।

अवेशयन् निन्द्रा येन्द्राया वेशयन् नवेशयन् निन्द्रायो देह्यु देहीन्द्राया वेशयन् नवेशयन् निन्द्रायो देहि ।

(13)[P23] 7.1.6.3(11)– इन्द्राय । उदेहि । इति ।

इन्द्रायो देह्यु देहीन्द्रा येन्द्रायो देहीती त्युदेहीन्द्रा येन्द्रायो देहीति ।

(14)[P23] 7.1.6.3(12)– उदेहि । इति । सा ।

उदेहीती त्युदेह्यु देहीति सा सेत्युदे ह्युदेहीति सा ।

(15)[P23] 7.1.6.3(12)– उदेहि ।

उदेहीत्युत् – एहि ।

(16)[P23] 7.1.6.3(13)– इति । सा । रोहिणी ।

इति सा सेतीति सा रोहिणी रोहिणी सेतीति सा रोहिणी ।

(17)[P23] 7.1.6.3(14)– सा । रोहिणी । लक्ष्मणा ।

सा रोहिणी रोहिणी सा सा रोहिणी लक्ष्मणा लक्ष्मणा रोहिणी सा सा रोहिणी लक्ष्मणा ।

(18)[P23] 7.1.6.3(15)– रोहिणी । लक्ष्मणा । पष्ठौही ।

रोहिणी लक्ष्मणा लक्ष्मणा रोहिणी रोहिणी लक्ष्मणा पष्ठौही पष्ठौही लक्ष्मणा रोहिणी रोहिणी लक्ष्मणा पष्ठौही ।

(19)[P23] 7.1.6.3(16)– लक्ष्मणा । पष्ठौही । वार्त्रघ्नी ।

लक्ष्मणा पष्ठौही पष्ठौही लक्ष्मणा लक्ष्मणा पष्ठौही वार्त्रघ्नी वार्त्रघ्नी पष्ठौही लक्ष्मणा लक्ष्मणा पष्ठौही वार्त्रघ्नी ।

(20)[P23] 7.1.6.3(17)– पष्ठौही । वार्त्रघ्नी । रूपम् ।

पष्ठौही वार्त्रघ्नी वार्त्रघ्नी पष्ठौही पष्ठौही वार्त्रघ्नी रूप(ग्म्) रूपं ँवार्त्रघ्नी पष्ठौही पष्ठौही वार्त्रघ्नी रूपम् ।

(21)[P23] 7.1.6.3(18)– वार्त्रघ्नी । रूपम् । कृत्वा ।

वार्त्रघ्नी रूप(ग्म्) रूपं ँवार्त्रघ्नी वार्त्रघ्नी रूपम् कृत्वा कृत्वा रूपं ँवार्त्रघ्नी वार्त्रघ्नी रूपम् कृत्वा ।

(22)[P23] 7.1.6.3(18)– वार्त्रघ्नी ।

वार्त्रघ्नीति वार्त्र – घ्नी ।

(23)[P23] 7.1.6.3(19)– रूपम् । कृत्वा । त्रयस्त्रि(ग्म्)शता ।

रूपम् कृत्वा कृत्वा रूप(ग्म्) रूपम् कृत्वा त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता कृत्वा रूप(ग्म्) रूपम् कृत्वा त्रयस्त्रि(ग्म्)शता ।

(24)[P23] 7.1.6.3(20)– कृत्वा । त्रयस्त्रि(ग्म्)शता । च ।

कृत्वा त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता कृत्वा कृत्वा त्रयस्त्रि(ग्म्)शता च च त्रयस्त्रि(ग्म्)शता कृत्वा कृत्वा त्रयस्त्रि(ग्म्)शता च ।

(25)[P23] 7.1.6.3(21)– त्रयस्त्रि(ग्म्)शता । च । त्रिभिः ।

त्रयस्त्रि(ग्म्)शता च च त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता च त्रिभि स्त्रिभि श्च त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता च त्रिभिः ।

(26)[P23] 7.1.6.3(21)– त्रयस्त्रि(ग्म्)शता ।

त्रयस्त्रि(ग्म्)शतेति त्रयः – त्रि(ग्म्)शता ।

(27)[P23] 7.1.6.3(22)– च । त्रिभिः । च ।

च त्रिभि स्त्रिभि श्च च त्रिभि श्च च त्रिभि श्च च त्रिभि श्च ।

(28)[P23] 7.1.6.3(23)– त्रिभिः । च । शतैः ।

त्रिभि श्च च त्रिभि स्त्रिभि श्च शतैः शतै श्च त्रिभि स्त्रिभि श्च शतैः ।

(29)[P23] 7.1.6.3(23)– त्रिभिः ।

त्रिभिरिति त्रि – भिः ।

(30)[P23] 7.1.6.3(24)– च । शतैः । सह ।

च शतैः शतै श्च च शतैः सह सह शतै श्च च शतैः सह ।

(31)[P23] 7.1.6.3(25)– शतैः । सह । उदैत् ।

शतैः सह सह शतैः शतैः सहोदै दुदैथ् सह शतैः शतैः सहोदैत् ।

(32)[P23] 7.1.6.3(26)– सह । उदैत् । तस्मात् ।

सहोदै दुदैथ् सह सहोदैत् तस्मात् तस्मा दुदैथ् सह सहोदैत् तस्मात् ।

(33)[P23] 7.1.6.3(27)– उदैत् । तस्मात् । रोहिणीम् ।

उदैत् तस्मात् तस्मा दुदै दुदैत् तस्माद् रोहिणी(ग्म्) रोहिणीम् तस्मा दुदै दुदैत् तस्माद् रोहिणीम् ।

(34)[P23] 7.1.6.3(27)– उदैत् ।

उदैदित्युत् – ऐत् ।

(35)[P23] 7.1.6.3(28)– तस्मात् । रोहिणीम् । लक्ष्मणाम् ।

तस्माद् रोहिणी(ग्म्) रोहिणीम् तस्मात् तस्माद् रोहिणीम् ँलक्ष्मणाम् ँलक्ष्मणा(ग्म्) रोहिणीम् तस्मात् तस्माद् रोहिणीम् ँलक्ष्मणाम् ।

(36)[P23] 7.1.6.3(29)– रोहिणीम् । लक्ष्मणाम् । पष्ठौहीम् ।

रोहिणीम् ँलक्ष्मणाम् ँलक्ष्मणा(ग्म्) रोहिणी(ग्म्) रोहिणीम् ँलक्ष्मणाम् पष्ठौहीम् पष्ठौहीम् ँलक्ष्मणा(ग्म्) रोहिणी(ग्म्) रोहिणीम् ँलक्ष्मणाम् पष्ठौहीम् ।

(37)[P23] 7.1.6.3(30)– लक्ष्मणाम् । पष्ठौहीम् । वार्त्रघ्नीम् ।

लक्ष्मणाम् पष्ठौहीम् पष्ठौहीम् ँलक्ष्मणाम् ँलक्ष्मणाम् पष्ठौहीं ँवार्त्रघ्नीं ँवार्त्रघ्नीम् पष्ठौहीम् ँलक्ष्मणाम् ँलक्ष्मणाम् पष्ठौहीं ँवार्त्रघ्नीम् ।

(38)[P23] 7.1.6.3(31)– पष्ठौहीम् । वार्त्रघ्नीम् । दद्यात् ।

पष्ठौहीं ँवार्त्रघ्नीं ँवार्त्रघ्नीम् पष्ठौहीम् पष्ठौहीं ँवार्त्रघ्नीम् दद्याद् दद्याद् वार्त्रघ्नीम् पष्ठौहीम् पष्ठौहीं ँवार्त्रघ्नीम् दद्यात् ।

(39)[P23] 7.1.6.3(32)– वार्त्रघ्नीम् । दद्यात् । यः ।

वार्त्रघ्नीम् दद्याद् दद्याद् वार्त्रघ्नीं ँवार्त्रघ्नीम् दद्याद् यो यो दद्याद् वार्त्रघ्नीं ँवार्त्रघ्नीम् दद्याद् यः ।

(40)[P23] 7.1.6.3(32)– वार्त्रघ्नीम् ।

वार्त्रघ्नीमिति वार्त्र – घ्नीम् ।

(41)[P23] 7.1.6.3(33)– दद्यात् । यः । एवम् ।

दद्याद् यो यो दद्याद् दद्याद् य एव मेवं ँयो दद्याद् दद्याद् य एवम् ।

(42)[P23] 7.1.6.3(34)- यः । ए॒वम् । वि॒द्वान् ।

य ए॒व मे॒वं ँयो य ए॒वं ँवि॒द्वान्. वि॒द्वा ने॒वं ँयो य ए॒वं ँवि॒द्वान् ।

(43)[P23] 7.1.6.3(35)- ए॒वम् । वि॒द्वान् । रोहि॑णीम् ।

ए॒वं ँवि॒द्वान्. वि॒द्वा ने॒व मे॒वं ँवि॒द्वान् रोहि॑णी॒(ग्म्॒) रोहि॑णीं ँवि॒द्वा ने॒व मे॒वं ँवि॒द्वान् रोहि॑णीम् ।

(44)[P23] 7.1.6.3(36)- वि॒द्वान् । रोहि॑णीम् । ल॒क्ष्म॒णाम् ।

वि॒द्वान् रोहि॑णी॒(ग्म्॒) रोहि॑णीं ँवि॒द्वान्. वि॒द्वान् रोहि॑णीम् ँलक्ष्म॒णाम् ँल॑क्ष्म॒णा(ग्म्) रोहि॑णीं ँवि॒द्वान्.
वि॒द्वान् रोहि॑णीम् ँलक्ष्म॒णाम् ।

(45)[P23] 7.1.6.3(37)- रोहि॑णीम् । ल॒क्ष्म॒णाम् । प॒ष्ठौ॒हीम् ।

रोहि॑णीम् ँलक्ष्म॒णाम् ँल॑क्ष्म॒णा(ग्म्) रोहि॑णी॒(ग्म्॒) रोहि॑णीम् ँलक्ष्म॒णाम् प॑ष्ठौ॒हीम् प॑ष्ठौ॒हीम्
ँल॑क्ष्म॒णा(ग्म्) रोहि॑णी॒(ग्म्॒) रोहि॑णीम् ँलक्ष्म॒णाम् प॑ष्ठौ॒हीम् ।

(46)[P23] 7.1.6.3(38)- ल॒क्ष्म॒णाम् । प॒ष्ठौ॒हीम् । वार्त्र॑घ्नीम् ।

ल॒क्ष्म॒णाम् प॑ष्ठौ॒हीम् प॑ष्ठौ॒हीम् ँल॒क्ष्म॑णाम् ँल॑क्ष्म॒णाम् प॑ष्ठौ॒हीं ँवार्त्र॑घ्नीं॒ ँवार्त्र॑घ्नीम् पष्ठौ॒हीम्
ँल॒॑क्ष्म॒णाम् ँल॑क्ष्म॒णाम् प॑ष्ठौ॒हीं ँवार्त्र॑घ्नीम् ।

(47)[P23] 7.1.6.3(39)- प॒ष्ठौ॒हीम् । वार्त्र॑घ्नीम् । ददा॑ति ।

प॒ष्ठौ॒हीं ँवार्त्र॑घ्नीं॒ ँवार्त्र॑घ्नीम् पष्ठौ॒हीम् प॑ष्ठौ॒हीं ँवार्त्र॑घ्नी॒म् ददा॑ति ददा॑ति॒ वार्त्र॑घ्नीम् पष्ठौ॒हीम् प॑ष्ठौ॒हीं
ँवार्त्र॑घ्नी॒म् ददा॑ति ।

(48)[P23] 7.1.6.3(40)- वार्त्र॑घ्नीम् । ददा॑ति । त्र॑यस्त्रि(ग्म्)शत् ।

वार्त्र॑घ्नी॒म् ददा॑ति॒ ददा॑ति॒ वार्त्र॑घ्नीं॒ ँवार्त्र॑घ्नी॒म् ददा॑ति॒ त्र॑यस्त्रि(ग्म्)श॒त् त्र॑यस्त्रि(ग्म्)श॒द् ददा॑ति॒
वार्त्र॑घ्नीं॒ ँवार्त्र॑घ्नी॒म् ददा॑ति॒ त्र॑यस्त्रि(ग्म्)शत् ।

(49)[P23] 7.1.6.3(40)- वार्त्र॑घ्नीम् ।

वार्त्र॑घ्नी॒मिति॒ वार्त्र॑ - घ्नी॒म् ।

(50)[P23] 7.1.6.3(41)– ददाति । त्रयस्त्रि(ग्म्)शत् । च ।

ददाति त्रयस्त्रि(ग्म्)शत् त्रयस्त्रि(ग्म्)शद् ददाति ददाति त्रयस्त्रि(ग्म्)शच् च च त्रयस्त्रि(ग्म्)शद् ददाति ददाति त्रयस्त्रि(ग्म्)शच् च ।

(51)[P23] 7.1.6.3(42)– त्रयस्त्रि(ग्म्)शत् । च । एव ।

त्रयस्त्रि(ग्म्)शच् च च त्रयस्त्रि(ग्म्)शत् त्रयस्त्रि(ग्म्)शच् चैवैव च त्रयस्त्रि(ग्म्)शत् त्रयस्त्रि(ग्म्)शच् चैव ।

(52)[P23] 7.1.6.3(42)– त्रयस्त्रि(ग्म्)शत् ।

त्रयस्त्रि(ग्म्)शदिति त्रयः – त्रि(ग्म्)शत् ।

(53)[P23] 7.1.6.3(43)– च । एव । अस्य ।

चैवैव च चैवास्या स्यैव च चैवास्य ।

(54)[P23] 7.1.6.3(44)– एव । अस्य । त्रीणि ।

एवास्या स्यैवै वास्य त्रीणि त्रीण्य स्यैवैवास्य त्रीणि ।

(55)[P23] 7.1.6.3(45)– अस्य । त्रीणि । च ।

अस्य त्रीणि त्रीण्य स्यास्य त्रीणि च च त्रीण्यस्यास्य त्रीणि च ।

(56)[P23] 7.1.6.3(46)– त्रीणि । च । शतानि ।

त्रीणि च च त्रीणि त्रीणि च शतानि शतानि च त्रीणि त्रीणि च शतानि ।

(57)[P23] 7.1.6.3(47)– च । शतानि । सा ।

च शतानि शतानि च च शतानि सा सा शतानि च च शतानि सा ।

(58)[P23] 7.1.6.3(48)– शतानि । सा । दत्ता ।

शतानि सा सा शतानि शतानि सा दत्ता दत्ता सा शतानि शतानि सा दत्ता ।

(59)[P23] 7.1.6.3(49)- सा । दत्ता । भवति ।

सा दत्ता दत्ता सा सा दत्ता भवति भवति दत्ता सा सा दत्ता भवति ।

(60)[P23] 7.1.6.3(50)- दत्ता । भवति । ताम् ।

दत्ता भवति भवति दत्ता दत्ता भवति ताम् ताम् भवति दत्ता दत्ता भवति ताम् ।

(1)[P24] 7.1.6.4(1)- भवति । ताम् । अफ्सु ।

भवति ताम् ताम् भवति भवति ता मफ्स्वफ्सु ताम् भवति भवति ता मफ्सु ।

(2)[P24] 7.1.6.4(2)- ताम् । अफ्सु । प्र ।

ता मफ्स्वफ्सु ताम् ता मफ्सु प्र प्राफ्सु ताम् ता मफ्सु प्र ।

(3)[P24] 7.1.6.4(3)- अफ्सु । प्र । अवेशयन्न् ।

अफ्सु प्र प्रा फ्स्वफ्सु प्रा वेशयन् नवेशयन् प्रा फ्स्वफ्सु प्रा वेशयन्न् ।

(4)[P24] 7.1.6.4(3)- अफ्सु ।

अफ्स्वित्यप् - सु ।

(5)[P24] 7.1.6.4(4)- प्र । अवेशयन्न् । यमाय ।

प्रा वेशयन् नवेशयन् प्र प्रा वेशयन्. यमाय यमाया वेशयन् प्र प्रा वेशयन्. यमाय ।

(6)[P24] 7.1.6.4(5)- अवेशयन्न् । यमाय । उदेहि ।

अवेशयन्. यमाय यमाया वेशयन् नवेशयन्. यमा योदे ह्युदेहि यमाया वेशयन् नवेशयन्. यमा योदेहि ।

(7)[P24] 7.1.6.4(6)- यमाय । उदेहि । इति । (GS-7.1-21)

यमा योदे ह्युदेहि यमाय यमा योदेहीती त्युदेहि यमाय यमा योदेहीति ।

(8)[P24] 7.1.6.4(7)- उदेहि । इति । सा । (GS-7.1-21)

उदेहीती त्युदे ह्युदेहीति सा सेत्युदे ह्युदेहीति सा ।

(9)[P24] 7.1.6.4(7)– उदेहि । (GS–7.1–21)

उदेहीत्युत् – एहि ।

(10)[P24] 7.1.6.4(8)– इति । सा । जरती । (GS–7.1–21)

इति सा सेतीति सा जरती जरती सेतीति सा जरती ।

(11)[P24] 7.1.6.4(9)– सा । जरती । मूर्खा । (GS–7.1–21)

सा जरती जरती सा सा जरती मूर्खा मूर्खा जरती सा सा जरती मूर्खा ।

(12)[P24] 7.1.6.4(10)– जरती । मूर्खा । तज्जघन्या । (GS–7.1–21)

जरती मूर्खा मूर्खा जरती जरती मूर्खा तज्जघन्या तज्जघन्या मूर्खा जरती जरती मूर्खा तज्जघन्या ।

(13)[P24] 7.1.6.4(11)– मूर्खा । तज्जघन्या । रूपम् ।

मूर्खा तज्जघन्या तज्जघन्या मूर्खा मूर्खा तज्जघन्या रूप(ग्म्) रूपम् तज्जघन्या मूर्खा मूर्खा तज्जघन्या रूपम् ।

(14)[P24] 7.1.6.4(12)– तज्जघन्या । रूपम् । कृत्वा ।

तज्जघन्या रूप(ग्म्) रूपम् तज्जघन्या तज्जघन्या रूपम् कृत्वा कृत्वा रूपम् तज्जघन्या तज्जघन्या रूपम् कृत्वा ।

(15)[P24] 7.1.6.4(12)– तज्जघन्या ।

तज्जघन्येति तत् – जघन्या ।

(16)[P24] 7.1.6.4(13)– रूपम् । कृत्वा । त्रयस्त्रि(ग्म्)शता ।

रूपम् कृत्वा कृत्वा रूप(ग्म्) रूपम् कृत्वा त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता कृत्वा रूप(ग्म्) रूपम् कृत्वा त्रयस्त्रि(ग्म्)शता ।

(17)[P24] 7.1.6.4(14)- कृत्वा । त्रयस्त्रि(ग्म्)शता । च ।

कृत्वा त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता कृत्वा कृत्वा त्रयस्त्रि(ग्म्)शता च च त्रयस्त्रि(ग्म्)शता कृत्वा कृत्वा त्रयस्त्रि(ग्म्)शता च ।

(18)[P24] 7.1.6.4(15)- त्रयस्त्रि(ग्म्)शता । च । त्रिभिः ।

त्रयस्त्रि(ग्म्)शता च च त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता च त्रिभि स्त्रिभि श्च त्रयस्त्रि(ग्म्)शता त्रयस्त्रि(ग्म्)शता च त्रिभिः ।

(19)[P24] 7.1.6.4(15)- त्रयस्त्रि(ग्म्)शता ।

त्रयस्त्रि(ग्म्)शतेति त्रयः - त्रि(ग्म्)शता ।

(20)[P24] 7.1.6.4(16)- च । त्रिभिः । च ।

च त्रिभि स्त्रिभि श्च च त्रिभि श्च च त्रिभि श्च च त्रिभि श्च ।

(21)[P24] 7.1.6.4(17)- त्रिभिः । च । शतैः ।

त्रिभि श्च च त्रिभि स्त्रिभि श्च शतैः शतै श्च त्रिभि स्त्रिभि श्च शतैः ।

(22)[P24] 7.1.6.4(17)- त्रिभिः ।

त्रिभिरिति त्रि - भिः ।

(23)[P24] 7.1.6.4(18)- च । शतैः । सह ।

च शतैः शतै श्च च शतैः सह सह शतै श्च च शतैः सह ।

(24)[P24] 7.1.6.4(19)- शतैः । सह । उदैत् ।

शतैः सह सह शतैः शतैः सहोदै दुदैथ् सह शतैः शतैः सहोदैत् ।

(25)[P24] 7.1.6.4(20)- सह । उदैत् । तस्मात् ।

सहोदै दुदैथ् सह सहोदैत् तस्मात् तस्मा दुदैथ् सह सहोदैत् तस्मात् ।

(26)[P24] 7.1.6.4(21)– उदैत् । तस्मात् । जरतीम् ।

उदैत् तस्मात् तस्मा दुदै दुदैत् तस्माज् जरतीम् जरतीम् तस्मा दुदै दुदैत् तस्माज् जरतीम् ।

(27)[P24] 7.1.6.4(21)– उदैत् ।

उदैदित्युत् – ऐत् ।

(28)[P24] 7.1.6.4(22)– तस्मात् । जरतीम् । मूर्खाम् ।

तस्माज् जरतीम् जरतीम् तस्मात् तस्माज् जरतीम् मूर्खाम् मूर्खाम् जरतीम् तस्मात् तस्माज् जरतीम् मूर्खाम् ।

(29)[P24] 7.1.6.4(23)– जरतीम् । मूर्खाम् । तज्जघन्याम् ।

जरतीम् मूर्खाम् मूर्खाम् जरतीम् जरतीम् मूर्खाम् तज्जघन्याम् तज्जघन्याम् मूर्खाम् जरतीम् जरतीम् मूर्खाम् तज्जघन्याम् ।

(30)[P24] 7.1.6.4(24)– मूर्खाम् । तज्जघन्याम् । अनुस्तरणीम् ।

मूर्खाम् तज्जघन्याम् तज्जघन्याम् मूर्खाम् मूर्खाम् तज्जघन्या मनुस्तरणी मनुस्तरणीम् तज्जघन्याम् मूर्खाम् मूर्खाम् तज्जघन्या मनुस्तरणीम् ।

(31)[P24] 7.1.6.4(25)– तज्जघन्याम् । अनुस्तरणीम् । कुर्वीत ।

तज्जघन्या मनुस्तरणी मनुस्तरणीम् तज्जघन्याम् तज्जघन्या मनुस्तरणीम् कुर्वीत कुर्वीता नुस्तरणीम् तज्जघन्याम् तज्जघन्या मनुस्तरणीम् कुर्वीत ।

(32)[P24] 7.1.6.4(25)– तज्जघन्याम् ।

तज्जघन्यामिति तत् – जघन्याम् ।

(33)[P24] 7.1.6.4(26)– अनुस्तरणीम् । कुर्वीत । यः ।

अनुस्तरणीम् कुर्वीत कुर्वीता नुस्तरणी मनुस्तरणीम् कुर्वीत यो यः कुर्वीता नुस्तरणी मनुस्तरणीम् कुर्वीत यः ।

(34)[P24] 7.1.6.4(26)- अनुस्तरणीम् ।

अनुस्तरणीमित्यनु - स्तरणीम् ।

(35)[P24] 7.1.6.4(27)- कुर्वीत । यः । एवम् ।

कुर्वीत यो यः कुर्वीत कुर्वीत य एव मेवं ँयः कुर्वीत कुर्वीत य एवम् ।

(36)[P24] 7.1.6.4(28)- यः । एवम् । विद्वान् ।

य एव मेवं ँयो य एवं ँविद्वान्. विद्वा नेवं ँयो य एवं ँविद्वान् ।

(37)[P24] 7.1.6.4(29)- एवम् । विद्वान् । जरतीम् ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् जरतीम् जरतीं ँविद्वा नेव मेवं ँविद्वान् जरतीम् ।

(38)[P24] 7.1.6.4(30)- विद्वान् । जरतीम् । मूर्खाम् ।

विद्वान् जरतीम् जरतीं ँविद्वान्. विद्वान् जरतीम् मूर्खाम् मूर्खाम् जरतीं ँविद्वान्. विद्वान् जरतीम् मूर्खाम् ।

(39)[P24] 7.1.6.4(31)- जरतीम् । मूर्खाम् । तज्जघन्याम् ।

जरतीम् मूर्खाम् मूर्खाम् जरतीम् जरतीम् मूर्खाम् तज्जघन्याम् तज्जघन्याम् मूर्खाम् जरतीम् जरतीम् मूर्खाम् तज्जघन्याम् ।

(40)[P24] 7.1.6.4(32)- मूर्खाम् । तज्जघन्याम् । अनुस्तरणीम् ।

मूर्खाम् तज्जघन्याम् तज्जघन्याम् मूर्खाम् मूर्खाम् तज्जघन्या मनुस्तरणी मनुस्तरणीम् तज्जघन्याम् मूर्खाम् मूर्खाम् तज्जघन्या मनुस्तरणीम् ।

(41)[P24] 7.1.6.4(33)- तज्जघन्याम् । अनुस्तरणीम् । कुरुते ।

तज्जघन्या मनुस्तरणी मनुस्तरणीम् तज्जघन्याम् तज्जघन्या मनुस्तरणीम् कुरुते कुरुते ऽनुस्तरणीम् तज्जघन्याम् तज्जघन्या मनुस्तरणीम् कुरुते ।

(42)[P24] 7.1.6.4(33)– तज्जघन्याम् ।

तज्जघन्यामिति तत् – जघन्याम् ।

(43)[P24] 7.1.6.4(34)– अनुस्तरणीम् । कुरुते । त्रयस्त्रि(ग्म्)शत् ।

अनुस्तरणीम् कुरुते कुरुते ऽनुस्तरणी मनुस्तरणीम् कुरुते त्रयस्त्रि(ग्म्)शत् त्रयस्त्रि(ग्म्)शत् कुरुते ऽनुस्तरणी मनुस्तरणीम् कुरुते त्रयस्त्रि(ग्म्)शत् ।

(44)[P24] 7.1.6.4(34)– अनुस्तरणीम् ।

अनुस्तरणीमित्यनु – स्तरणीम् ।

(45)[P24] 7.1.6.4(35)– कुरुते । त्रयस्त्रि(ग्म्)शत् । च ।

कुरुते त्रयस्त्रि(ग्म्)शत् त्रयस्त्रि(ग्म्)शत् कुरुते कुरुते त्रयस्त्रि(ग्म्)शच् च च त्रयस्त्रि(ग्म्)शत् कुरुते कुरुते त्रयस्त्रि(ग्म्)शच् च ।

(46)[P24] 7.1.6.4(36)– त्रयस्त्रि(ग्म्)शत् । च । एव ।

ए॒तम् प॑ञ्चरा॒त्रम् प॑ञ्चरा॒त्र मे॒त मे॒तम् प॑ञ्चरा॒त्र मा प॑ञ्चरा॒त्र मे॒त मे॒तम् प॑ञ्चरा॒त्र मा ।

(22)[P37] 7.1.10.2(19)– प॒ञ्च॒रा॒त्रम् । आ । अ॒ह॒र॒त् ।

प॒ञ्च॒रा॒त्र मा प॑ञ्चरा॒त्रम् प॑ञ्चरा॒त्र मा ऽह॑र दह॒रदा प॑ञ्चरा॒त्रम् प॑ञ्चरा॒त्र मा ऽह॑रत् ।

(23)[P37] 7.1.10.2(19)– प॒ञ्च॒रा॒त्रम् ।

प॒ञ्च॒रा॒त्रमिति॑ पञ्च – रा॒त्रम् ।

(24)[P37] 7.1.10.2(20)– आ । अ॒ह॒र॒त् । तेन॑ ।

आ ऽह॑र दह॒रदा ऽह॒॑रत् तेन॒ तेना॑ ह॒रदा ऽह॒॑रत् तेन॑ ।

(25)[P37] 7.1.10.2(21)– अ॒ह॒र॒त् । तेन॑ । अ॒य॒ज॒त ।

अ॒ह॒र॒त् तेन॒ तेना॑ हर दह॒रत् तेना॑ यजता यज॒त॒ तेना॑ हर दह॒रत् तेना॑ यजत ।

(26)[P37] 7.1.10.2(22)– तेन॑ । अ॒य॒ज॒त । तत॑ः ।

तेना॑ यजता यज॒त॒ तेन॒ तेना॑ यज॒त॒ तत॒ स्ततो॑ ऽयज॒त॒ तेन॒ तेना॑ यज॒त॒ ततः॑ ।

(27)[P37] 7.1.10.2(23)- अयजत । ततः । वै ।

अयजत तत स्ततो ऽयजता यजत ततो वै वै ततो ऽयजता यजत ततो वै ।

(28)[P37] 7.1.10.2(24)- ततः । वै । सः ।

ततो वै वै तत स्ततो वै स स वै तत स्ततो वै सः ।

(29)[P37] 7.1.10.2(25)- वै । सः । सहस्रम् ।

वै स स वै वै स सहस्र(ग्म्) सहस्र(ग्म्) स वै वै स सहस्रम् ।

(30)[P37] 7.1.10.2(26)- सः । सहस्रम् । पशून् ।

स सहस्र(ग्म्) सहस्र(ग्म्) स स सहस्रम् पशून् पशून् थ्सहस्र(ग्म्) स स सहस्रम् पशून् ।

(31)[P37] 7.1.10.2(27)- सहस्रम् । पशून् । प्र ।

सहस्रम् पशून् पशून् थ्सहस्र(ग्म्) सहस्रम् पशून् प्र प्र पशून् थ्सहस्र(ग्म्) सहस्रम् पशून् प्र ।

(32)[P37] 7.1.10.2(28)- पशून् । प्र । आप्नोत् ।

पशून् प्र प्र पशून् पशून् प्राप्नो दाप्नोत् प्र पशून् पशून् प्राप्नोत् ।

(33)[P37] 7.1.10.2(29)- प्र । आप्नोत् । यः ।

प्राप्नो दाप्नोत् प्र प्राप्नोद् यो य आप्नोत् प्र प्राप्नोद् यः ।

(34)[P37] 7.1.10.2(30)- आप्नोत् । यः । एवम् ।

आप्नोद् यो य आप्नो दाप्नोद् य एव मेवं ँय आप्नो दाप्नोद् य एवम् ।

(35)[P37] 7.1.10.2(31)- यः । एवम् । विद्वान् ।

य एव मेवं ँयो य एवं ँविद्वान्. विद्वा नेवं ँयो य एवं ँविद्वान् ।

(36)[P37] 7.1.10.2(32)– एवम् । विद्वान् । पञ्चरात्रेण ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् पञ्चरात्रेण पञ्चरात्रेण विद्वा नेव मेवं ँविद्वान् पञ्चरात्रेण ।

(37)[P37] 7.1.10.2(33)– विद्वान् । पञ्चरात्रेण । यजते ।

विद्वान् पञ्चरात्रेण पञ्चरात्रेण विद्वान्. विद्वान् पञ्चरात्रेण यजते यजते पञ्चरात्रेण विद्वान्. विद्वान् पञ्चरात्रेण यजते ।

(38)[P37] 7.1.10.2(34)– पञ्चरात्रेण । यजते । प्र ।

पञ्चरात्रेण यजते यजते पञ्चरात्रेण पञ्चरात्रेण यजते प्र प्र यजते पञ्चरात्रेण पञ्चरात्रेण यजते प्र ।

(39)[P37] 7.1.10.2(34)– पञ्चरात्रेण ।

पञ्चरात्रेणेति पञ्च – रात्रेण ।

(40)[P37] 7.1.10.2(35)– यजते । प्र । सहस्रम् ।

यजते प्र प्र यजते यजते प्र सहस्र(ग्म्)॑ सहस्रम् प्र यजते यजते प्र सहस्रम् ।

(41)[P37] 7.1.10.2(36)– प्र । सहस्रम् । पशून् ।

प्र सहस्र(ग्म्)॑ सहस्रम् प्र प्र सहस्रम् पशून् पशून् थ्सहस्रम् प्र प्र सहस्रम् पशून् ।

(42)[P37] 7.1.10.2(37)– सहस्रम् । पशून् । आप्नोति ।

सहस्रम् पशून् पशून् थ्सहस्र(ग्म्)॑ सहस्रम् पशू नाप्नो त्याप्नोति पशून् थ्सहस्र(ग्म्)॑ सहस्रम् पशू नाप्नोति ।

(43)[P37] 7.1.10.2(38)– पशून् । आप्नोति । बबरः ।

पशू नाप्नो त्याप्नोति पशून् पशू नाप्नोति बबरो बबर आप्नोति पशून् पशू नाप्नोति बबरः ।

(44)[P37] 7.1.10.2(39)- आप्नोति । बबरः । प्रावाहणिः ।

आप्नोति बबरो बबर आप्नो त्याप्नोति बबरः प्रावाहणिः प्रावाहणिर् बबर आप्नो त्याप्नोति बबरः प्रावाहणिः ।

(45)[P37] 7.1.10.2(40)- बबरः । प्रावाहणिः । अकामयत ।

बबरः प्रावाहणिः प्रावाहणिर् बबरो बबरः प्रावाहणि रकामयता कामयत प्रावाहणिर् बबरो बबरः प्रावाहणि रकामयत ।

(46)[P37] 7.1.10.2(41)- प्रावाहणिः । अकामयत । वाचः ।

प्रावाहणि रकामयता कामयत प्रावाहणिः प्रावाहणि रकामयत वाचो वाचो ऽकामयत प्रावाहणिः प्रावाहणि रकामयत वाचः ।

(47)[P37] 7.1.10.2(42)- अकामयत । वाचः । प्रवदिता ।

अकामयत वाचो वाचो ऽकामयता कामयत वाचः प्रवदिता प्रवदिता वाचो ऽकामयता कामयत वाचः प्रवदिता ।

(48)[P37] 7.1.10.2(43)- वाचः । प्रवदिता । स्याम् ।

वाचः प्रवदिता प्रवदिता वाचो वाचः प्रवदिता स्या(गग्) स्याम् प्रवदिता वाचो वाचः प्रवदिता स्याम् ।

(49)[P37] 7.1.10.2(44)- प्रवदिता । स्याम् । इति ।

प्रवदिता स्या(गग्) स्याम् प्रवदिता प्रवदिता स्या मितीति स्याम् प्रवदिता प्रवदिता स्या मिति ।

(50)[P37] 7.1.10.2(44)- प्रवदिता ।

प्रवदितेति प्र - वदिता ।

(51)[P37] 7.1.10.2(45)- स्याम् । इति । सः ।

स्या मितीति स्या(गग्) स्या मिति स स इति स्या(गग्) स्या मिति सः ।

(52)[P37] 7.1.10.2(46)– इति । सः । एतम् ।

इति स स इतीति स एत मेत(ग्म्) स इतीति स एतम् ।

(53)[P37] 7.1.10.2(47)– सः । एतम् । पञ्चरात्रम् ।

स एत मेत(ग्म्) स स एतम् पञ्चरात्रम् पञ्चरात्र मेत(ग्म्) स स एतम् पञ्चरात्रम् ।

(54)[P37] 7.1.10.2(48)– एतम् । पञ्चरात्रम् । आ ।

एतम् पञ्चरात्रम् पञ्चरात्र मेत मेतम् पञ्चरात्र मा पञ्चरात्र मेत मेतम् पञ्चरात्र मा ।

(55)[P37] 7.1.10.2(49)– पञ्चरात्रम् । आ । अहरत् ।

पञ्चरात्र मा पञ्चरात्रम् पञ्चरात्र मा ऽहर दहरदा पञ्चरात्रम् पञ्चरात्र मा ऽहरत् ।

(56)[P37] 7.1.10.2(49)– पञ्चरात्रम् ।

पञ्चरात्रमिति पञ्च – रात्रम् ।

(57)[P37] 7.1.10.2(50)– आ । अहरत् । तेन ।

आ ऽहर दहरदा ऽहरत् तेन तेना हरदा ऽहरत् तेन ।

(1)[P38] 7.1.10.3(1)– अहरत् । तेन । अयजत ।

अहरत् तेन तेना हर दहरत् तेना यजता यजत तेना हर दहरत् तेना यजत ।

(2)[P38] 7.1.10.3(2)– तेन । अयजत । ततः ।

तेना यजता यजत तेन तेना यजत तत स्ततो ऽयजत तेन तेना यजत ततः ।

(3)[P38] 7.1.10.3(3)– अयजत । ततः । वै ।

अयजत तत स्ततो ऽयजता यजत ततो वै वै ततो ऽयजता यजत ततो वै ।

(4)[P38] 7.1.10.3(4)– ततः । वै । सः ।

ततो वै वै तत स्ततो वै स स वै तत स्ततो वै सः ।

(5)[P38] 7.1.10.3(5)- वै । सः । वाचः ।

वै स स वै वै स वाचो वाचः स वै वै स वाचः ।

(6)[P38] 7.1.10.3(6)- सः । वाचः । प्रवदिता ।

स वाचो वाचः स स वाचः प्रवदिता प्रवदिता वाचः स स वाचः प्रवदिता ।

(7)[P38] 7.1.10.3(7)- वाचः । प्रवदिता । अभवत् ।

वाचः प्रवदिता प्रवदिता वाचो वाचः प्रवदिता ऽभव दभवत् प्रवदिता वाचो वाचः प्रवदिता ऽभवत् ।

(8)[P38] 7.1.10.3(8)- प्रवदिता । अभवत् । यः ।

प्रवदिता ऽभव दभवत् प्रवदिता प्रवदिता ऽभवद् यो यो ऽभवत् प्रवदिता प्रवदिता ऽभवद् यः ।

(9)[P38] 7.1.10.3(8)- प्रवदिता ।

प्रवदितेति प्र - वदिता ।

(10)[P38] 7.1.10.3(9)- अभवत् । यः । एवम् ।

अभवद् यो यो ऽभव दभवद् य एव मेवं ँयो ऽभव दभवद् य एवम् ।

(11)[P38] 7.1.10.3(10)- यः । एवम् । विद्वान् ।

य एव मेवं ँयो य एवं ँविद्वान्. विद्वा नेवं ँयो य एवं ँविद्वान् ।

(12)[P38] 7.1.10.3(11)- एवम् । विद्वान् । पञ्चरात्रेण ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् पञ्चरात्रेण पञ्चरात्रेण विद्वा नेव मेवं ँविद्वान् पञ्चरात्रेण ।

(13)[P38] 7.1.10.3(12)- विद्वान् । पञ्चरात्रेण । यजते ।

विद्वान् पञ्चरात्रेण पञ्चरात्रेण विद्वान्. विद्वान् पञ्चरात्रेण यजते यजते पञ्चरात्रेण विद्वान्. विद्वान् पञ्चरात्रेण यजते ।

(14)[P38] 7.1.10.3(13)- पञ्चरात्रेण । यजते । प्रवदिता ।

पञ्चरात्रेण यजते यजते पञ्चरात्रेण पञ्चरात्रेण यजते प्रवदिता प्रवदिता यजते पञ्चरात्रेण पञ्चरात्रेण यजते प्रवदिता ।

(15)[P38] 7.1.10.3(13)- पञ्चरात्रेण ।

पञ्चरात्रेणेति पञ्च - रात्रेण ।

(16)[P38] 7.1.10.3(14)- यजते । प्रवदिता । एव ।

यजते प्रवदिता प्रवदिता यजते यजते प्रवदि तैवैव प्रवदिता यजते यजते प्रवदितैव ।

(17)[P38] 7.1.10.3(15)- प्रवदिता । एव । वाचः ।

प्रवदितैवैव प्रवदिता प्रवदितैव वाचो वाच एव प्रवदिता प्रवदितैव वाचः ।

(18)[P38] 7.1.10.3(15)- प्रवदिता ।

प्रवदितेति प्र - वदिता ।

(19)[P38] 7.1.10.3(16)- एव । वाचः । भवति ।

एव वाचो वाच एवैव वाचो भवति भवति वाच एवैव वाचो भवति ।

(20)[P38] 7.1.10.3(17)- वाचः । भवति । अथो ।

वाचो भवति भवति वाचो वाचो भव त्यथो अथो भवति वाचो वाचो भव त्यथो ।

(21)[P38] 7.1.10.3(18)- भवति । अथो । एनम् ।

भव त्यथो अथो भवति भव त्यथो एन मेन मथो भवति भव त्यथो एनम् ।

(22)[P38] 7.1.10.3(19)- अथो । एनम् । वाचः । (GS-7.1-32)

अथो एन मेन मथो अथो एनं ँवाचो वाच एन मथो अथो एनं ँवाचः ।

(23)[P38] 7.1.10.3(19)- अथो । (GS-7.1-32)

अथो इत्यथो ।

(24)[P38] 7.1.10.3(20)- ए॒न॒म् । वा॒चः । पति॑ः । (GS-7.1-32)

ए॒नं॒ ँवा॒चो वा॒च ए॑न मेनं॒ ँवा॒च स्पति॒ष् पति॑र् वा॒च ए॑न मेनं॒ ँवा॒च स्पति॑ः ।

(25)[P38] 7.1.10.3(21)- वा॒चः । पति॑ः । इति॑ । (GS-7.1-32)

वा॒च स्पति॒ष् पति॑र् वा॒चो वा॒च स्पति॒ रितीति॒ पति॑र् वा॒चो वा॒च स्पति॒ रिति॑ ।

(26)[P38] 7.1.10.3(22)- पति॑ः । इति॑ । आ॒हु॒ः । (GS-7.1-32)

पति॒रितीति॒ पति॒ष् पति॒ रित्या॑हु राहु॒ रिति॒ पति॒ष् पति॒ रित्या॑हु॒ः ।

(27)[P38] 7.1.10.3(23)- इति॑ । आ॒हु॒ः । अना᳚प्तः । (GS-7.1-32)

इत्या॑हु राहु॒ रिती त्या॑हु॒ रना॒प्तो ऽना᳚प्त आहु॒ रिती त्या॑हु॒ रना᳚प्तः ।

(28)[P38] 7.1.10.3(24)- आ॒हु॒ः । अना᳚प्तः । च॒तू॒रा॒त्रः । (GS-7.1-32)

आ॒हु॒ रना॒प्तो ऽना᳚प्त आहु राहु॒ रना᳚प्त श्चतूरा॒त्र श्च॑तूरा॒त्रो ऽना᳚प्त आहु राहु॒ रना᳚प्त श्चतूरा॒त्रः ।

(29)[P38] 7.1.10.3(25)- अना᳚प्तः । च॒तू॒रा॒त्रः । अति॑रिक्तः ।

अना᳚प्त श्चतूरा॒त्र श्च॑तूरा॒त्रो ऽना॒प्तो ऽना᳚प्त श्चतूरा॒त्रो ऽति॑रि॒क्तो ऽति॑रिक्त श्चतूरा॒त्रो ऽना॒प्तो ऽना᳚प्त
श्चतू॑रा॒त्रो ऽतिरिक्तः ।

(30)[P38] 7.1.10.3(26)- च॒तू॒रा॒त्रः । अति॑रिक्तः । ष॒ड्रा॒त्रः ।

च॒तू॒रा॒त्रो ऽति॑रि॒क्तो ऽति॑रिक्त श्चतूरा॒त्र श्च॑तूरा॒त्रो ऽति॑रिक्त ष्षड्रा॒त्र ष्ष॑ड्रा॒त्रो ऽति॑रिक्त श्चतूरा॒त्र श्च॑तूरा॒त्रो
ऽति॑रिक्त ष्षड्रा॒त्रः ।

(31)[P38] 7.1.10.3(26)- च॒तू॒रा॒त्रः ।

च॒तू॒रा॒त्र इति॑ चतुः - रा॒त्रः ।

(32)[P38] 7.1.10.3(27)- अति॑रिक्तः । ष॒ड्रा॒त्रः । अथ॑ ।

अति॑रिक्त ष्षड्रा॒त्र ष्ष॑ड्रा॒त्रो ऽति॑रि॒क्तो ऽति॑रिक्त ष्षड्रा॒त्रो ऽथा॑थ षड्रा॒त्रो ऽति॑रि॒क्तो ऽति॑रिक्त
ष्षड्रा॒त्रो ऽथ॑ ।

(33)[P38] 7.1.10.3(27)- अतिरिक्तः ।

अतिरिक्त इत्यति - रिक्तः ।

(34)[P38] 7.1.10.3(28)- षड्रात्रः । अथ । वै ।

षड्रात्रो ऽथाथ षड्रात्र ष्षड्रात्रो ऽथ वै वा अथ षड्रात्र ष्षड्रात्रो ऽथ वै ।

(35)[P38] 7.1.10.3(28)- षड्रात्रः ।

षड्रात्र इति षट् - रात्रः ।

(36)[P38] 7.1.10.3(29)- अथ । वै । एषः ।

अथ वै वा अथाथ वा एष एष वा अथाथ वा एषः ।

(37)[P38] 7.1.10.3(30)- वै । एषः । संप्रति ।

वा एष एष वै वा एष संप्रति संप्र त्येष वै वा एष संप्रति ।

(38)[P38] 7.1.10.3(31)- एषः । संप्रति । यज्ञः ।

एष संप्रति संप्र त्येष एष संप्रति यज्ञो यज्ञः संप्र त्येष एष संप्रति यज्ञः ।

(39)[P38] 7.1.10.3(32)- संप्रति । यज्ञः । यत् ।

संप्रति यज्ञो यज्ञः संप्रति संप्रति यज्ञो यद् यद् यज्ञः संप्रति संप्रति यज्ञो यत् ।

(40)[P38] 7.1.10.3(32)- संप्रति ।

संप्रतीति सं - प्रति ।

(41)[P38] 7.1.10.3(33)- यज्ञः । यत् । पञ्चरात्रः ।

यज्ञो यद् यद् यज्ञो यज्ञो यत् पञ्चरात्रः पञ्चरात्रो यद् यज्ञो यज्ञो यत् पञ्चरात्रः ।

(42)[P38] 7.1.10.3(34)- यत् । पञ्चरात्रः । यः ।

यत् पञ्चरात्रः पञ्चरात्रो यद् यत् पञ्चरात्रो यो यः पञ्चरात्रो यद् यत् पञ्चरात्रो यः ।

(43)[P38] 7.1.10.3(35)- पञ्चरात्रः । यः । एवम् ।

पञ्चरात्रो यो यः पञ्चरात्रः पञ्चरात्रो य एव मेवं ँयः पञ्चरात्रः पञ्चरात्रो य एवम् ।

(44)[P38] 7.1.10.3(35)- पञ्चरात्रः ।

पञ्चरात्र इति पञ्च - रात्रः ।

(45)[P38] 7.1.10.3(36)- यः । एवम् । विद्वान् ।

य एव मेवं ँयो य एवं ँविद्वान्. विद्वा नेवं ँयो य एवं ँविद्वान् ।

(46)[P38] 7.1.10.3(37)- एवम् । विद्वान् । पञ्चरात्रेण ।

एवं ँविद्वान्. विद्वा नेव मेवं ँविद्वान् पञ्चरात्रेण पञ्चरात्रेण विद्वा नेव मेवं ँविद्वान् पञ्चरात्रेण ।

(47)[P38] 7.1.10.3(38)- विद्वान् । पञ्चरात्रेण । यजते ।

विद्वान् पञ्चरात्रेण पञ्चरात्रेण विद्वान्. विद्वान् पञ्चरात्रेण यजते यजते पञ्चरात्रेण विद्वान्. विद्वान् पञ्चरात्रेण यजते ।

(48)[P38] 7.1.10.3(39)- पञ्चरात्रेण । यजते । संप्रति ।

पञ्चरात्रेण यजते यजते पञ्चरात्रेण पञ्चरात्रेण यजते संप्रति संप्रति यजते पञ्चरात्रेण पञ्चरात्रेण यजते संप्रति ।

(49)[P38] 7.1.10.3(39)- पञ्चरात्रेण ।

पञ्चरात्रेणेति पञ्च - रात्रेण ।

(50)[P38] 7.1.10.3(40)- यजते । संप्रति । एव ।

यजते संप्रति संप्रति यजते यजते संप्र त्येवैव संप्रति यजते यजते संप्र त्येव ।

(51)[P38] 7.1.10.3(41)- संप्रति । एव । यज्ञेन ।

संप्र त्येवैव संप्रति संप्र त्येव यज्ञेन यज्ञेनैव संप्रति संप्र त्येव यज्ञेन ।

(52)[P38] 7.1.10.3(41)– संप्रति ।

सम्प्रतीति सं – प्रति ।

(53)[P38] 7.1.10.3(42)– एव । यज्ञेन । यजते ।

एव यज्ञेन यज्ञेनैवैव यज्ञेन यजते यजते यज्ञेनैवैव यज्ञेन यजते ।

(54)[P38] 7.1.10.3(43)– यज्ञेन । यजते । पञ्चरात्रः ।

यज्ञेन यजते यजते यज्ञेन यज्ञेन यजते पञ्चरात्रः पञ्चरात्रो यजते यज्ञेन यज्ञेन यजते पञ्चरात्रः ।

(55)[P38] 7.1.10.3(44)– यजते । पञ्चरात्रः । भवति ।

यजते पञ्चरात्रः पञ्चरात्रो यजते यजते पञ्चरात्रो भवति भवति पञ्चरात्रो यजते यजते पञ्चरात्रो भवति ।

(56)[P38] 7.1.10.3(45)– पञ्चरात्रः । भवति । पञ्च ।

पञ्चरात्रो भवति भवति पञ्चरात्रः पञ्चरात्रो भवति पञ्च पञ्च भवति पञ्चरात्रः पञ्चरात्रो भवति पञ्च ।

(57)[P38] 7.1.10.3(45)– पञ्चरात्रः ।

पञ्चरात्र इति पञ्च – रात्रः ।

(58)[P38] 7.1.10.3(46)– भवति । पञ्च । वै ।

भवति पञ्च पञ्च भवति भवति पञ्च वै वै पञ्च भवति भवति पञ्च वै ।

(59)[P38] 7.1.10.3(47)– पञ्च । वै । ऋतवः ।

पञ्च वै वै पञ्च पञ्च वा ऋतव ऋतवो वै पञ्च पञ्च वा ऋतवः ।

(60)[P38] 7.1.10.3(48)– वै । ऋतवः । सँवथ्सरः ।

वा ऋतव ऋतवो वै वा ऋतवः सँवथ्सरः सँवथ्सर ऋतवो वै वा ऋतवः सँवथ्सरः ।

(61)[P38] 7.1.10.3(49)- ऋतवः । सँवथ्सरः । ऋतुषु ।

ऋतवः सँवथ्सरः सँवथ्सर ऋतव ऋतवः सँवथ्सर ऋतुष् वृतुषु सँवथ्सर ऋतव ऋतवः सँवथ्सर ऋतुषु ।

(62)[P38] 7.1.10.3(50)- सँवथ्सरः । ऋतुषु । एव ।

सँवथ्सर ऋतुष् वृतुषु सँवथ्सरः सँवथ्सर ऋतुष्वेवैव र्तुषु सँवथ्सरः सँवथ्सर ऋतुष्वेव ।

(63)[P38] 7.1.10.3(50)- सँवथ्सरः ।

सँवथ्सर इति सं - वथ्सरः ।

(1)[P39] 7.1.10.4(1)- ऋतुषु । एव । सँवथ्सरे ।

ऋतुष्वेवैव र्तुष् वृतु ष्वेव सँवथ्सरे सँवथ्सर एव र्तुष् वृतु ष्वेव सँवथ्सरे ।

(2)[P39] 7.1.10.4(2)- एव । सँवथ्सरे । प्रति ।

एव सँवथ्सरे सँवथ्सर एवैव सँवथ्सरे प्रति प्रति सँवथ्सर एवैव सँवथ्सरे प्रति ।

(3)[P39] 7.1.10.4(3)- सँवथ्सरे । प्रति । तिष्ठति ।

सँवथ्सरे प्रति प्रति सँवथ्सरे सँवथ्सरे प्रति तिष्ठति तिष्ठति प्रति सँवथ्सरे सँवथ्सरे प्रति तिष्ठति ।

(4)[P39] 7.1.10.4(3)- सँवथ्सरे ।

सँवथ्सर इति सं - वथ्सरे ।

(5)[P39] 7.1.10.4(4)- प्रति । तिष्ठति । अथो ।

प्रति तिष्ठति तिष्ठति प्रति प्रति तिष्ठ त्यथो अथो तिष्ठति प्रति प्रति तिष्ठ त्यथो ।

(6)[P39] 7.1.10.4(5)- तिष्ठति । अथो । पञ्चाक्षरा ।

तिष्ठ त्यथो अथो तिष्ठति तिष्ठ त्यथो पञ्चाक्षरा पञ्चाक्षरा ऽथो तिष्ठति तिष्ठ त्यथो पञ्चाक्षरा ।

(7)[P39] 7.1.10.4(6)– अथो । पञ्चाक्षरा । पङ्क्तिः ।

अथो पञ्चाक्षरा पञ्चाक्षरा ऽथो अथो पञ्चाक्षरा पङ्क्तिः पङ्क्तिः पञ्चाक्षरा ऽथो अथो पञ्चाक्षरा पङ्क्तिः ।

(8)[P39] 7.1.10.4(6)– अथो ।

अथो इत्यथो ।

(9)[P39] 7.1.10.4(7)– पञ्चाक्षरा । पङ्क्तिः । पाङ्क्तः ।

पञ्चाक्षरा पङ्क्तिः पङ्क्तिः पञ्चाक्षरा पञ्चाक्षरा पङ्क्तिः पाङ्क्तः पाङ्क्तः पङ्क्तिः पञ्चाक्षरा पञ्चाक्षरा पङ्क्तिः पाङ्क्तः ।

(10)[P39] 7.1.10.4(7)– पञ्चाक्षरा ।

पञ्चाक्षरेति पञ्च – अक्षरा ।

(11)[P39] 7.1.10.4(8)– पङ्क्तिः । पाङ्क्तः । यज्ञः ।

पङ्क्तिः पाङ्क्तः पाङ्क्तः पङ्क्तिः पङ्क्तिः पाङ्क्तो यज्ञो यज्ञः पाङ्क्तः पङ्क्तिः पङ्क्तिः पाङ्क्तो यज्ञः ।

(12)[P39] 7.1.10.4(9)– पाङ्क्तः । यज्ञः । यज्ञम् ।

पाङ्क्तो यज्ञो यज्ञः पाङ्क्तः पाङ्क्तो यज्ञो यज्ञं ँयज्ञं ँयज्ञः पाङ्क्तः पाङ्क्तो यज्ञो यज्ञम् ।

(13)[P39] 7.1.10.4(10)– यज्ञः । यज्ञम् । एव ।

यज्ञो यज्ञं ँयज्ञं ँयज्ञो यज्ञो यज्ञ मेवैव यज्ञं ँयज्ञो यज्ञो यज्ञ मेव ।

(14)[P39] 7.1.10.4(11)– यज्ञम् । एव । अव ।

यज्ञ मेवैव यज्ञं ँयज्ञ मेवावा वैव यज्ञं ँयज्ञ मेवाव ।

(15)[P39] 7.1.10.4(12)– एव । अव । रुन्धे ।

एवावा वैवै वाव रुन्धे रुन्धे ऽवैवै वाव रुन्धे ।

(16)[P39] 7.1.10.4(13)- अव । रुन्धे । त्रिवृत् ।

अव रुन्धे रुन्धे ऽवाव रुन्धे त्रिवृत् त्रिवृद् रुन्धे ऽवाव रुन्धे त्रिवृत् ।

(17)[P39] 7.1.10.4(14)- रुन्धे । त्रिवृत् । अग्निष्टोमः ।

रुन्धे त्रिवृत् त्रिवृद् रुन्धे रुन्धे त्रिवृ दग्निष्टोमो ऽग्निष्टोम स्त्रिवृद् रुन्धे रुन्धे त्रिवृ दग्निष्टोमः ।

(18)[P39] 7.1.10.4(15)- त्रिवृत् । अग्निष्टोमः । भवति ।

त्रिवृ दग्निष्टोमो ऽग्निष्टोम स्त्रिवृत् त्रिवृ दग्निष्टोमो भवति भव त्यग्निष्टोम स्त्रिवृत् त्रिवृ दग्निष्टोमो भवति ।

(19)[P39] 7.1.10.4(15)- त्रिवृत् ।

त्रिवृदिति त्रि - वृत् ।

(20)[P39] 7.1.10.4(16)- अग्निष्टोमः । भवति । तेजः ।

अग्निष्टोमो भवति भव त्यग्निष्टोमो ऽग्निष्टोमो भवति तेज स्तेजो भव त्यग्निष्टोमो ऽग्निष्टोमो भवति तेजः ।

(21)[P39] 7.1.10.4(16)- अग्निष्टोमः ।

अग्निष्टोम इत्यग्नि - स्तोमः ।

(22)[P39] 7.1.10.4(17)- भवति । तेजः । एव ।

भवति तेज स्तेजो भवति भवति तेज एवैव तेजो भवति भवति तेज एव ।

(23)[P39] 7.1.10.4(18)- तेजः । एव । अव ।

तेज एवैव तेज स्तेज एवावा वैव तेज स्तेज एवाव ।

(24)[P39] 7.1.10.4(19)- एव । अव । रुन्धे ।

एवावा वैवै वाव रुन्धे रुन्धे ऽवैवै वाव रुन्धे ।

(25)[P39] 7.1.10.4(20)– अव । रुन्धे । पञ्चदशः ।

अव रुन्धे रुन्धे ऽवाव रुन्धे पञ्चदशः पञ्चदशो रुन्धे ऽवाव रुन्धे पञ्चदशः ।

(26)[P39] 7.1.10.4(21)– रुन्धे । पञ्चदशः । भवति ।

रुन्धे पञ्चदशः पञ्चदशो रुन्धे रुन्धे पञ्चदशो भवति भवति पञ्चदशो रुन्धे रुन्धे पञ्चदशो भवति ।

(27)[P39] 7.1.10.4(22)– पञ्चदशः । भवति । इन्द्रियम् ।

पञ्चदशो भवति भवति पञ्चदशः पञ्चदशो भव तीन्द्रिय मिन्द्रियम् भवति पञ्चदशः पञ्चदशो भव तीन्द्रियम् ।

(28)[P39] 7.1.10.4(22)– पञ्चदशः ।

पञ्चदश इति पञ्च – दशः ।

(29)[P39] 7.1.10.4(23)– भवति । इन्द्रियम् । एव ।

भव तीन्द्रिय मिन्द्रियम् भवति भव तीन्द्रिय मेवैवेन्द्रियम् भवति भव तीन्द्रिय मेव ।

(30)[P39] 7.1.10.4(24)– इन्द्रियम् । एव । अव ।

इन्द्रिय मेवैवेन्द्रिय मिन्द्रिय मेवावा वैवेन्द्रिय मिन्द्रिय मेवाव ।

(31)[P39] 7.1.10.4(25)– एव । अव । रुन्धे ।

एवावा वैवै वाव रुन्धे रुन्धे ऽवैवै वाव रुन्धे ।

(32)[P39] 7.1.10.4(26)– अव । रुन्धे । सप्तदशः ।

अव रुन्धे रुन्धे ऽवाव रुन्धे सप्तदशः सप्तदशो रुन्धे ऽवाव रुन्धे सप्तदशः ।

(33)[P39] 7.1.10.4(27)– रुन्धे । सप्तदशः । भवति ।

रुन्धे सप्तदशः सप्तदशो रुन्धे रुन्धे सप्तदशो भवति भवति सप्तदशो रुन्धे रुन्धे सप्तदशो भवति ।

(34)[P39] 7.1.10.4(28)- सप्तदशः । भवति । अन्नाद्यस्य ।

सप्तदशो भवति भवति सप्तदशः सप्तदशो भव त्यन्नाद्यस्या न्नाद्यस्य भवति सप्तदशः सप्तदशो भव त्यन्नाद्यस्य ।

(35)[P39] 7.1.10.4(28)- सप्तदशः ।

सप्तदश इति सप्त - दशः ।

(36)[P39] 7.1.10.4(29)- भवति । अन्नाद्यस्य । अवरुद्ध्यै ।

भव त्यन्नाद्यस्या न्नाद्यस्य भवति भव त्यन्नाद्यस्या वरुद्ध्या अवरुद्ध्या अन्नाद्यस्य भवति भव त्यन्नाद्यस्या वरुद्ध्यै ।

(37)[P39] 7.1.10.4(30)- अन्नाद्यस्य । अवरुद्ध्यै । अथो ।

अन्नाद्यस्या वरुद्ध्या अवरुद्ध्या अन्नाद्यस्या न्नाद्यस्या वरुद्ध्या अथो अथो अवरुद्ध्या अन्नाद्यस्या न्नाद्यस्या वरुद्ध्या अथो ।

(38)[P39] 7.1.10.4(30)- अन्नाद्यस्य ।

अन्नाद्यस्येत्यन्न - अद्यस्य ।

(39)[P39] 7.1.10.4(31)- अवरुद्ध्यै । अथो । प्र ।

अवरुद्ध्या अथो अथो अवरुद्ध्या अवरुद्ध्या अथो प्र प्राथो अवरुद्ध्या अवरुद्ध्या अथो प्र ।

(40)[P39] 7.1.10.4(31)- अवरुद्ध्यै ।

अवरुद्ध्या इत्यव - रुद्ध्यै ।

(41)[P39] 7.1.10.4(32)- अथो । प्र । एव ।

अथो प्र प्राथो अथो प्रैवैव प्राथो अथो प्रैव ।

(42)[P39] 7.1.10.4(32)– अथो ।

अथो इत्यथो ।

(43)[P39] 7.1.10.4(33)– प्र । एव । तेन ।

प्रैवैव प्र प्रैव तेन तेनैव प्र प्रैव तेन ।

(44)[P39] 7.1.10.4(34)– एव । तेन । जायते ।

एव तेन तेनैवैव तेन जायते जायते तेनैवैव तेन जायते ।

(45)[P39] 7.1.10.4(35)– तेन । जायते । पञ्चवि(ग्म्)शः ।

तेन जायते जायते तेन तेन जायते पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो जायते तेन तेन जायते पञ्चवि(ग्म्)शः ।

(46)[P39] 7.1.10.4(36)– जायते । पञ्चवि(ग्म्)शः । अग्निष्टोमः ।

जायते पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो जायते जायते पञ्चवि(ग्म्)शो ऽग्निष्टोमो ऽग्निष्टोमः पञ्चवि(ग्म्)शो जायते जायते पञ्चवि(ग्म्)शो ऽग्निष्टोमः ।

(47)[P39] 7.1.10.4(37)– पञ्चवि(ग्म्)शः । अग्निष्टोमः । भवति ।

पञ्चवि(ग्म्)शो ऽग्निष्टोमो ऽग्निष्टोमः पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो ऽग्निष्टोमो भवति भव त्यग्निष्टोमः पञ्चवि(ग्म्)शः पञ्चवि(ग्म्)शो ऽग्निष्टोमो भवति ।

(48)[P39] 7.1.10.4(37)– पञ्चवि(ग्म्)शः ।

पञ्चवि(ग्म्)श इति पञ्च – वि(ग्म्)शः ।

(49)[P39] 7.1.10.4(38)– अग्निष्टोमः । भवति । प्रजापतेः ।

अग्निष्टोमो भवति भव त्यग्निष्टोमो ऽग्निष्टोमो भवति प्रजापतेः प्रजापतेर् भव त्यग्निष्टोमो ऽग्निष्टोमो भवति प्रजापतेः ।

(50)[P39] 7.1.10.4(38)- अग्निष्टोमः ।

अग्निष्टोम इत्यग्नि - स्तोमः ।

(51)[P39] 7.1.10.4(39)- भवति । प्रजापतेः । आप्त्यै ।

भवति प्रजापतेः प्रजापतेर् भवति भवति प्रजापते राप्त्या आप्त्यै प्रजापतेर् भवति भवति प्रजापते राप्त्यै ।

(52)[P39] 7.1.10.4(40)- प्रजापतेः । आप्त्यै । महाव्रतवान् ।

प्रजापते राप्त्या आप्त्यै प्रजापतेः प्रजापते राप्त्यै महाव्रतवान् महाव्रतवा नाप्त्यै प्रजापतेः प्रजापते राप्त्यै महाव्रतवान् ।

(53)[P39] 7.1.10.4(40)- प्रजापतेः ।

प्रजापतेरिति प्रजा - पतेः ।

(54)[P39] 7.1.10.4(41)- आप्त्यै । महाव्रतवान् । अन्नाद्यस्य ।

आप्त्यै महाव्रतवान् महाव्रतवा नाप्त्या आप्त्यै महाव्रतवा नन्नाद्यस्या न्नाद्यस्य महाव्रतवा नाप्त्या आप्त्यै महाव्रतवा नन्नाद्यस्य ।

(55)[P39] 7.1.10.4(42)- महाव्रतवान् । अन्नाद्यस्य । अवरुद्ध्यै ।

महाव्रतवा नन्नाद्यस्या न्नाद्यस्य महाव्रतवान् महाव्रतवा नन्नाद्यस्या वरुद्ध्या अवरुद्ध्या अन्नाद्यस्य महाव्रतवान् महाव्रतवा नन्नाद्यस्या वरुद्ध्यै ।

(56)[P39] 7.1.10.4(42)- महाव्रतवान् ।

महाव्रतवानिति महाव्रत - वान् ।

(57)[P39] 7.1.10.4(43)- अन्नाद्यस्य । अवरुद्ध्यै । विश्वजित् ।

अन्नाद्यस्या वरुद्ध्या अवरुद्ध्या अन्नाद्यस्या न्नाद्यस्या वरुद्ध्यै विश्वजिद् विश्वजि दवरुद्ध्या अन्नाद्यस्या न्नाद्यस्या वरुद्ध्यै विश्वजित् ।

(58)[P39] 7.1.10.4(43)– अन्नाद्यस्य ।

अन्नाद्यस्येत्यन्न – अद्यस्य ।

(59)[P39] 7.1.10.4(44)– अवरुद्ध्यै । विश्वजित् । सर्वपृष्ठः ।

अवरुद्ध्यै विश्वजिद् विश्वजि दवरुद्ध्या अवरुद्ध्यै विश्वजिथ् सर्वपृष्ठः सर्वपृष्ठो विश्वजि दवरुद्ध्या अवरुद्ध्यै विश्वजिथ् सर्वपृष्ठः ।

(60)[P39] 7.1.10.4(44)– अवरुद्ध्यै ।

अवरुद्ध्या इत्यव – रुद्ध्यै ।

(61)[P39] 7.1.10.4(45)– विश्वजित् । सर्वपृष्ठः । अतिरात्रः ।

विश्वजिथ् सर्वपृष्ठः सर्वपृष्ठो विश्वजिद् विश्वजिथ् सर्वपृष्ठो ऽतिरात्रो ऽतिरात्रः सर्वपृष्ठो विश्वजिद् विश्वजिथ् सर्वपृष्ठो ऽतिरात्रः ।

(62)[P39] 7.1.10.4(45)– विश्वजित् ।

विश्वजिदिति विश्व – जित् ।

(63)[P39] 7.1.10.4(46)– सर्वपृष्ठः । अतिरात्रः । भवति ।

सर्वपृष्ठो ऽतिरात्रो ऽतिरात्रः सर्वपृष्ठः सर्वपृष्ठो ऽतिरात्रो भवति भव त्यतिरात्रः सर्वपृष्ठः सर्वपृष्ठो ऽतिरात्रो भवति ।

(64)[P39] 7.1.10.4(46)– सर्वपृष्ठः ।

सर्वपृष्ठ इति सर्व – पृष्ठः ।

(65)[P39] 7.1.10.4(47)– अतिरात्रः । भवति । सर्वस्य ।

अतिरात्रो भवति भव त्यतिरात्रो ऽतिरात्रो भवति सर्वस्य सर्वस्य भव त्यतिरात्रो ऽतिरात्रो भवति सर्वस्य ।

(66)[P39] 7.1.10.4(47)- अतिरात्रः ।

अतिरात्र इत्यति - रात्रः ।

(67)[P39] 7.1.10.4(48)- भवति । सर्वस्य । अभिजित्यै ॥

भवति सर्वस्य सर्वस्य भवति भवति सर्वस्या भिजित्या अभिजित्यै सर्वस्य भवति भवति सर्वस्या भिजित्यै ।

(68)[P39] 7.1.10.4(49)- सर्वस्य । अभिजित्यै ॥

सर्वस्या भिजित्या अभिजित्यै सर्वस्य सर्वस्या भिजित्यै ।

(69)[P39] 7.1.10.4(50)- अभिजित्यै ॥

अभिजित्या इत्यभि - जित्यै ।

=======

## 7.1.11 अनुवाकम् 11 – घनम्

(1)[P40] 7.1.11.1(1)– देवस्य । त्वा । सवितुः ।

देवस्य त्वा त्वा देवस्य देवस्य त्वा सवितुः सवितु स्त्वा देवस्य देवस्य त्वा सवितुः ।

(2)[P40] 7.1.11.1(2)– त्वा । सवितुः । प्रसवे ।

त्वा सवितुः सवितु स्त्वा त्वा सवितुः प्रसवे प्रसवे सवितु स्त्वा त्वा सवितुः प्रसवे ।

(3)[P40] 7.1.11.1(3)– सवितुः । प्रसवे । अश्विनोः ।

सवितुः प्रसवे प्रसवे सवितुः सवितुः प्रसवे ऽश्विनो रश्विनोः प्रसवे सवितुः सवितुः प्रसवे ऽश्विनोः ।

(4)[P40] 7.1.11.1(4)– प्रसवे । अश्विनोः । बाहुभ्याम् ।

प्रसवे ऽश्विनो रश्विनोः प्रसवे प्रसवे ऽश्विनोर् बाहुभ्याम् बाहुभ्या मश्विनोः प्रसवे प्रसवे ऽश्विनोर् बाहुभ्याम् ।

(5)[P40] 7.1.11.1(4)– प्रसवे ।

प्रसव इति प्र – सवे ।

(6)[P40] 7.1.11.1(5)– अश्विनोः । बाहुभ्याम् । पूष्णः ।

अश्विनोर् बाहुभ्याम् बाहुभ्या मश्विनो रश्विनोर् बाहुभ्याम् पूष्णः पूष्णो बाहुभ्या मश्विनो रश्विनोर् बाहुभ्याम् पूष्णः ।

(7)[P40] 7.1.11.1(6)– बाहुभ्याम् । पूष्णः । हस्ताभ्याम् ।

बाहुभ्याम् पूष्णः पूष्णो बाहुभ्याम् बाहुभ्याम् पूष्णो हस्ताभ्या(ग्म्) हस्ताभ्याम् पूष्णो बाहुभ्याम् बाहुभ्याम् पूष्णो हस्ताभ्याम् ।

(8)[P40] 7.1.11.1(6)– बाहुभ्याम् ।

बाहुभ्यामिति बाहु – भ्याम् ।

(9)[P40] 7.1.11.1(7)– पू॒ष्णः । हस्ता᳚भ्याम् । आ ।

पू॒ष्णो हस्ता᳚भ्या॒(ग्म्॒) हस्ता᳚भ्याम् पू॒ष्णः पू॒ष्णो हस्ता᳚भ्या॒ मा हस्ता᳚भ्याम् पू॒ष्णः पू॒ष्णो
हस्ता᳚भ्या॒ मा ।

(10)[P40] 7.1.11.1(8)– हस्ता᳚भ्याम् । आ । द॒दे॒ ।

हस्ता᳚भ्या॒ मा हस्ता᳚भ्या॒(ग्म्॒) हस्ता᳚भ्या॒ मा द॑दे दद॒ आ हस्ता᳚भ्या॒(ग्म्॒) हस्ता᳚भ्या॒ मा द॑दे ।

(11)[P40] 7.1.11.1(9)– आ । द॒दे॒ । इ॒माम् ।

आ द॑दे दद॒ आ द॑द इ॒मा मि॒माम् द॑द॒ आ द॑द इ॒माम् ।

(12)[P40] 7.1.11.1(10)– द॒दे॒ । इ॒माम् । अ॒गृ॒भ्ण॒न्न् ।

द॒द॒ इ॒मा मि॒माम् द॑दे दद इ॒मा म॑गृभ्णन् नगृभ्णन् नि॒माम् द॑दे दद इ॒मा म॑गृभ्णन्न् ।

(13)[P40] 7.1.11.1(11)– इ॒माम् । अ॒गृ॒भ्ण॒न्न् । र॒श॒नाम् ।

इ॒मा म॑गृभ्णन् नगृभ्णन् नि॒मा मि॒मा म॑गृभ्णन् रश॒ना(ग्म्) र॑श॒ना म॑गृभ्णन् नि॒मा मि॒मा म॑गृभ्णन्
रश॒नाम् ।

(14)[P40] 7.1.11.1(12)– अ॒गृ॒भ्ण॒न्न् । र॒श॒नाम् । ऋ॒तस्य॑ ।

अ॒गृ॒भ्ण॒न् र॒श॒ना(ग्म्) र॑श॒ना म॑गृभ्णन् नगृभ्णन् रश॒ना मृ॒तस्य॒ र्‌तस्य॑ रश॒ना म॑गृभ्णन् नगृभ्णन्
रश॒ना मृ॒तस्य॑ ।

(15)[P40] 7.1.11.1(13)– र॒श॒नाम् । ऋ॒तस्य॑ । पूर्वे᳚ ।

र॒श॒ना मृ॒तस्य॒ र्‌तस्य॑ रश॒ना(ग्म्) र॑श॒ना मृ॒तस्य॒ पूर्वे॒ पूर्व॑ ऋ॒तस्य॑ रश॒ना(ग्म्) र॑श॒ना
मृ॒तस्य॒ पूर्वे᳚ ।

(16)[P40] 7.1.11.1(14)– ऋ॒तस्य॑ । पूर्वे᳚ । आयु॑षि ।

ऋ॒तस्य॒ पूर्वे॒ पूर्व॑ ऋ॒तस्य॒ र्‌तस्य॒ पूर्व॒ आयु॒ ष्यायु॑षि॒ पूर्व॑ ऋ॒तस्य॒ र्‌तस्य॒ पूर्व॒ आयु॑षि ।

(17)[P40] 7.1.11.1(15)– पूर्वे । आयुषि । विदथेषु ।

पूर्व आयु ष्यायुषि पूर्वे पूर्व आयुषि विदथेषु विदथे ष्यायुषि पूर्वे पूर्व आयुषि विदथेषु ।

(18)[P40] 7.1.11.1(16)– आयुषि । विदथेषु । कव्या ॥

आयुषि विदथेषु विदथे ष्वायु ष्यायुषि विदथेषु कव्या कव्या विदथे ष्वायु ष्यायुषि विदथेषु कव्या ।

(19)[P40] 7.1.11.1(17)– विदथेषु । कव्या ॥

विदथेषु कव्या कव्या विदथेषु विदथेषु कव्या ।

(20)[P40] 7.1.11.1(18)– कव्या ॥

कव्येति कव्या ।

(21)[P40] 7.1.11.1(19)– तया । देवाः । सुतम् ।

तया देवा देवा स्तया तया देवाः सुत(ग्म्) सुतम् देवा स्तया तया देवाः सुतम् ।

(22)[P40] 7.1.11.1(20)– देवाः । सुतम् । आ ।

देवाः सुत(ग्म्) सुतम् देवा देवाः सुत मा सुतम् देवा देवाः सुत मा ।

(23)[P40] 7.1.11.1(21)– सुतम् । आ । बभूवुः ।

सुत मा सुत(ग्म्) सुत मा बभूवुर् बभूवुरा सुत(ग्म्) सुत मा बभूवुः ।

(24)[P40] 7.1.11.1(22)– आ । बभूवुः । ऋतस्य ।

आ बभूवुर् बभूवुरा बभूवुर्. ऋतस्य र्तस्य बभूवुरा बभूवुर्. ऋतस्य ।

(25)[P40] 7.1.11.1(23)– बभूवुः । ऋतस्य । सामन्न् ।

बभूवुर्. ऋतस्य र्तस्य बभूवुर् बभूवुर्. ऋतस्य सामन् थ्सामन् नृतस्य बभूवुर् बभूवुर्. ऋतस्य सामन्न् ।

(26)[P40] 7.1.11.1(24)- ऋतस्य । सामन्न् । सरम् ।

ऋतस्य सामन् थ्सामन् नृतस्य र्तस्य सामन् थ्सर(ग्म्) सर(ग्म्) सामन् नृतस्य र्तस्य सामन् थ्सरम् ।

(27)[P40] 7.1.11.1(25)- सामन्न् । सरम् । आरपन्ती ॥

सामन् थ्सर(ग्म्) सर(ग्म्) सामन् थ्सामन् थ्सर मारप न्त्यारपन्ती सर(ग्म्) सामन् थ्सामन् थ्सर मारपन्ती ।

(28)[P40] 7.1.11.1(26)- सरम् । आरपन्ती ॥

सर मारप न्त्यारपन्ती सर(ग्म्) सर मारपन्ती ।

(29)[P40] 7.1.11.1(27)- आरपन्ती ॥

आरपन्तीत्या - रपन्ती ।

(30)[P40] 7.1.11.1(28)- अभिधाः । असि । भुवनम् ।

अभिधा अस्यस्य भिधा अभिधा असि भुवनम् भुवन मस्यभिधा अभिधा असि भुवनम् ।

(31)[P40] 7.1.11.1(28)- अभिधाः ।

अभिधा इत्यभि - धाः ।

(32)[P40] 7.1.11.1(29)- असि । भुवनम् । असि ।

असि भुवनम् भुवन मस्यसि भुवन मस्यसि भुवन मस्यसि भुवन मसि ।

(33)[P40] 7.1.11.1(30)- भुवनम् । असि । यन्ता ।

भुवन मस्यसि भुवनम् भुवन मसि यन्ता यन्ता ऽसि भुवनम् भुवन मसि यन्ता ।

(34)[P40] 7.1.11.1(31)- असि । यन्ता । असि ।

असि यन्ता यन्ता ऽस्यसि यन्ता ऽस्यसि यन्ता ऽस्यसि यन्ता ऽसि ।

(35)[P40] 7.1.11.1(32)– य॒न्ता । अ॒सि॒ । ध॒र्ता ।

य॒न्ता ऽस्य॑सि य॒न्ता य॒न्ता ऽसि॑ ध॒र्ता ध॒र्ता ऽसि॑ य॒न्ता य॒न्ता ऽसि॑ ध॒र्ता ।

(36)[P40] 7.1.11.1(33)– अ॒सि॒ । ध॒र्ता । अ॒सि॒ ।

अ॒सि॒ ध॒र्ता ध॒र्ता ऽस्य॑सि ध॒र्ता ऽस्य॑सि ध॒र्ता ऽस्य॑सि ध॒र्ता ऽसि॑ ।

(37)[P40] 7.1.11.1(34)– ध॒र्ता । अ॒सि॒ । सः ।

ध॒र्ता ऽस्य॑सि ध॒र्ता ध॒र्ता ऽसि॒ स सो॑ ऽसि ध॒र्ता ध॒र्ता ऽसि॒ सः ।

(38)[P40] 7.1.11.1(35)– अ॒सि॒ । सः । अ॒ग्निम् ।

अ॒सि॒ स सो᳚ ऽस्यसि॒ सो᳚ ऽग्नि म॒ग्नि(ग्म्) सो᳚ ऽस्यसि॒ सो᳚ ऽग्निम् ।

(39)[P40] 7.1.11.1(36)– सः । अ॒ग्निम् । वै॒श्वा॒न॒रम् ।

सो᳚ ऽग्नि म॒ग्नि(ग्म्) स सो᳚ ऽग्निं ँ᳚वैश्वान॒रं ँ᳚वैश्वान॒र म॒ग्नि(ग्म्) स सो᳚ ऽग्निं ँ᳚वैश्वान॒रम् ।

(40)[P40] 7.1.11.1(37)– अ॒ग्निम् । वै॒श्वा॒न॒रम् । सप्र॑थसम् ।

अ॒ग्निं ँ᳚वैश्वान॒रं ँ᳚वैश्वान॒र म॒ग्नि म॒ग्निं ँ᳚वैश्वान॒र(ग्म्) सप्र॑थस॒(ग्म्॒) सप्र॑थसं ँवैश्वान॒र म॒ग्नि म॒ग्निं
ँ᳚वैश्वान॒र(ग्म्) सप्र॑थसम् ।

(41)[P40] 7.1.11.1(38)– वै॒श्वा॒न॒रम् । सप्र॑थसम् । ग॒च्छ॒ ।

वै॒श्वा॒न॒र(ग्म्) सप्र॑थस॒(ग्म्॒) सप्र॑थसं ँवैश्वान॒रं ँ᳚वैश्वान॒र(ग्म्) सप्र॑थसम् गच्छ गच्छ॒ सप्र॑थसं
ँवैश्वान॒रं ँ᳚वैश्वान॒र(ग्म्) सप्र॑थसम् गच्छ ।

(42)[P40] 7.1.11.1(39)– सप्र॑थसम् । ग॒च्छ॒ । स्वाहा॑कृतः ।

सप्र॑थसम् गच्छ गच्छ॒ सप्र॑थस॒(ग्म्॒) सप्र॑थसम् गच्छ॒ स्वाहा॑कृत॒ः स्वाहा॑कृतो गच्छ॒
सप्र॑थस॒(ग्म्॒) सप्र॑थसम् गच्छ॒ स्वाहाकृतः ।

(43)[P40] 7.1.11.1(39)– सप्र॑थसम् ।

सप्र॑थस॒मिति॒ स – प्र॒थ॒स॒म् ।

(44)[P40] 7.1.11.1(40)- गच्छ । स्वाहाकृतः । पृथिव्याम् ।

गच्छ स्वाहाकृतः स्वाहाकृतो गच्छ गच्छ स्वाहाकृतः पृथिव्याम् पृथिव्या(गग्) स्वाहाकृतो गच्छ गच्छ स्वाहाकृतः पृथिव्याम् ।

(45)[P40] 7.1.11.1(41)- स्वाहाकृतः । पृथिव्याम् । यन्ता ।

स्वाहाकृतः पृथिव्याम् पृथिव्या(गग्) स्वाहाकृतः स्वाहाकृतः पृथिव्यां ँयन्ता यन्ता पृथिव्या(गग्) स्वाहाकृतः स्वाहाकृतः पृथिव्यां ँयन्ता ।

(46)[P40] 7.1.11.1(41)- स्वाहाकृतः ।

स्वाहाकृत इति स्वाहा - कृतः ।

(47)[P40] 7.1.11.1(42)- पृथिव्याम् । यन्ता । राट् ।

पृथिव्यां ँयन्ता यन्ता पृथिव्याम् पृथिव्यां ँयन्ता राड् राड् यन्ता पृथिव्याम् पृथिव्यां ँयन्ता राट् ।

(48)[P40] 7.1.11.1(43)- यन्ता । राट् । यन्ता ।

यन्ता राड् राड् यन्ता यन्ता राड् यन्ता यन्ता राड् यन्ता यन्ता राड् यन्ता ।

(49)[P40] 7.1.11.1(44)- राट् । यन्ता । असि ।

राड् यन्ता यन्ता राड् राड् यन्ता ऽस्यसि यन्ता राड् राड् यन्ता ऽसि ।

(50)[P40] 7.1.11.1(45)- यन्ता । असि । यमनः ।

यन्ता ऽस्यसि यन्ता यन्ता ऽसि यमनो यमनो ऽसि यन्ता यन्ता ऽसि यमनः ।

(51)[P40] 7.1.11.1(46)- असि । यमनः । धर्ता ।

असि यमनो यमनो ऽस्यसि यमनो धर्ता धर्ता यमनो ऽस्यसि यमनो धर्ता ।

(52)[P40] 7.1.11.1(47)- यमनः । धर्ता । असि ।

यमनो धर्ता धर्ता यमनो यमनो धर्ता ऽस्यसि धर्ता यमनो यमनो धर्ता ऽसि ।

(53)[P40] 7.1.11.1(48)- धर्ता । असि । धरुणः ।

धर्ता ऽस्यसि धर्ता धर्ता ऽसि धरुणो धरुणो ऽसि धर्ता धर्ता ऽसि धरुणः ।

(54)[P40] 7.1.11.1(49)- असि । धरुणः । कृष्यै ।

असि धरुणो धरुणो ऽस्यसि धरुणः कृष्यै कृष्यै धरुणो ऽस्यसि धरुणः कृष्यै ।

(55)[P40] 7.1.11.1(50)- धरुणः । कृष्यै । त्वा ।

धरुणः कृष्यै कृष्यै धरुणो धरुणः कृष्यै त्वा त्वा कृष्यै धरुणो धरुणः कृष्यै त्वा ।

(56)[P40] 7.1.11.1(51)- कृष्यै । त्वा । क्षेमाय ।

कृष्यै त्वा त्वा कृष्यै कृष्यै त्वा क्षेमाय क्षेमाय त्वा कृष्यै कृष्यै त्वा क्षेमाय ।

(57)[P40] 7.1.11.1(52)- त्वा । क्षेमाय । त्वा ।

त्वा क्षेमाय क्षेमाय त्वा त्वा क्षेमाय त्वा त्वा क्षेमाय त्वा त्वा क्षेमाय त्वा ।

(58)[P40] 7.1.11.1(53)- क्षेमाय । त्वा । रय्यै ।

क्षेमाय त्वा त्वा क्षेमाय क्षेमाय त्वा रय्यै रय्यै त्वा क्षेमाय क्षेमाय त्वा रय्यै ।

(59)[P40] 7.1.11.1(54)- त्वा । रय्यै । त्वा ।

त्वा रय्यै रय्यै त्वा त्वा रय्यै त्वा त्वा रय्यै त्वा त्वा रय्यै त्वा ।

(60)[P40] 7.1.11.1(55)- रय्यै । त्वा । पोषाय ।

रय्यै त्वा त्वा रय्यै रय्यै त्वा पोषाय पोषाय त्वा रय्यै रय्यै त्वा पोषाय ।

(61)[P40] 7.1.11.1(56)- त्वा । पोषाय । त्वा ।

त्वा पोषाय पोषाय त्वा त्वा पोषाय त्वा त्वा पोषाय त्वा त्वा पोषाय त्वा ।

(62)[P40] 7.1.11.1(57)- पोषाय । त्वा । पृथिव्यै ।

पोषाय त्वा त्वा पोषाय पोषाय त्वा पृथिव्यै पृथिव्यै त्वा पोषाय पोषाय त्वा पृथिव्यै ।

(63)[P40] 7.1.11.1(58)– त्वा॒ । पृ॒थि॒व्यै । त्वा॒ ।

त्वा॒ पृ॒थि॒व्यै पृ॑थि॒व्यै त्वा᳚ त्वा पृथि॒व्यै त्वा᳚ त्वा पृथि॒व्यै त्वा᳚ त्वा पृथि॒व्यै त्वा᳚ ।

(64)[P40] 7.1.11.1(59)– पृ॒थि॒व्यै । त्वा॒ । अ॒न्तरि॑क्षाय ।

पृ॒थि॒व्यै त्वा᳚ त्वा पृथि॒व्यै पृ॑थि॒व्यै त्वा॒ ऽन्तरि॑क्षाया॒ न्तरि॑क्षाय त्वा पृथि॒व्यै पृ॑थि॒व्यै
त्वा॒ ऽन्तरि॑क्षाय ।

(65)[P40] 7.1.11.1(60)– त्वा॒ । अ॒न्तरि॑क्षाय । त्वा॒ ।

त्वा॒ ऽन्तरि॑क्षाया॒ न्तरि॑क्षाय त्वा त्वा॒ ऽन्तरि॑क्षाय त्वा त्वा॒ ऽन्तरि॑क्षाय त्वा त्वा॒ ऽन्तरि॑क्षाय त्वा ।

(66)[P40] 7.1.11.1(61)– अ॒न्तरि॑क्षाय । त्वा॒ । दि॒वे ।

अ॒न्तरि॑क्षाय त्वा त्वा॒ ऽन्तरि॑क्षाया॒ न्तरि॑क्षाय त्वा दि॒वे दि॒वे त्वा॒ ऽन्तरि॑क्षाया॒ न्तरि॑क्षाय त्वा दि॒वे ।

(67)[P40] 7.1.11.1(62)– त्वा॒ । दि॒वे । त्वा॒ ।

त्वा॒ दि॒वे दि॒वे त्वा᳚ त्वा दि॒वे त्वा᳚ त्वा दि॒वे त्वा᳚ त्वा दि॒वे त्वा᳚ ।

(68)[P40] 7.1.11.1(63)– दि॒वे । त्वा॒ । स॒ते ।

दि॒वे त्वा᳚ त्वा दि॒वे दि॒वे त्वा॑ स॒ते स॒ते त्वा॑ दि॒वे दि॒वे त्वा॑ स॒ते ।

(69)[P40] 7.1.11.1(64)– त्वा॒ । स॒ते । त्वा॒ ।

त्वा॒ स॒ते स॒ते त्वा᳚ त्वा स॒ते त्वा᳚ त्वा स॒ते त्वा᳚ त्वा स॒ते त्वा᳚ ।

(70)[P40] 7.1.11.1(65)– स॒ते । त्वा॒ । अस॑ते ।

स॒ते त्वा᳚ त्वा स॒ते स॒ते त्वा ऽस॒ते ऽस॑ते त्वा स॒ते स॒ते त्वा ऽस॑ते ।

(71)[P40] 7.1.11.1(66)– त्वा॒ । अस॑ते । त्वा॒ ।

त्वा ऽस॒ते ऽस॑ते त्वा॒ त्वा ऽस॑ते त्वा॒ त्वा ऽस॑ते त्वा॒ त्वा ऽस॑ते त्वा ।

(72)[P40] 7.1.11.1(67)– अस॑ते । त्वा॒ । अ॒द्भ्यः ।

अस॑ते त्वा॒ त्वा ऽस॒ते ऽस॑ते त्वा॒ ऽद्भ्यो᳚ ऽद्भ्य स्त्वा ऽस॒ते ऽस॑ते त्वा॒ ऽद्भ्यः ।

(73)[P40] 7.1.11.1(68)– त्वा । अद्भ्यः । त्वा ।

त्वा ऽद्भ्यो ऽद्भ्य स्त्वा त्वा ऽद्भ्य स्त्वा त्वा ऽद्भ्य स्त्वा त्वा ऽद्भ्य स्त्वा ।

(74)[P40] 7.1.11.1(69)– अद्भ्यः । त्वा । ओषधीभ्यः ।

अद्भ्य स्त्वा त्वा ऽद्भ्यो ऽद्भ्य स्त्वौषधीभ्य ओषधीभ्य स्त्वा ऽद्भ्यो ऽद्भ्य स्त्वौषधीभ्यः ।

(75)[P40] 7.1.11.1(69)– अद्भ्यः ।

अद्भ्य इत्यत् – भ्यः ।

(76)[P40] 7.1.11.1(70)– त्वा । ओषधीभ्यः । त्वा ।

त्वौषधीभ्य ओषधीभ्य स्त्वा त्वौषधीभ्य स्त्वा त्वौषधीभ्य स्त्वा त्वौषधीभ्य स्त्वा ।

(77)[P40] 7.1.11.1(71)– ओषधीभ्यः । त्वा । विश्वेभ्यः ।

ओषधीभ्य स्त्वा त्वौषधीभ्य ओषधीभ्य स्त्वा विश्वेभ्यो विश्वेभ्य स्त्वौषधीभ्य ओषधीभ्य स्त्वा विश्वेभ्यः ।

(78)[P40] 7.1.11.1(71)– ओषधीभ्यः ।

ओषधीभ्य इत्योषधि – भ्यः ।

(79)[P40] 7.1.11.1(72)– त्वा । विश्वेभ्यः । त्वा ।

त्वा विश्वेभ्यो विश्वेभ्य स्त्वा त्वा विश्वेभ्य स्त्वा त्वा विश्वेभ्य स्त्वा त्वा विश्वेभ्य स्त्वा ।

(80)[P40] 7.1.11.1(73)– विश्वेभ्यः । त्वा । भूतेभ्यः ॥

विश्वेभ्य स्त्वा त्वा विश्वेभ्यो विश्वेभ्य स्त्वा भूतेभ्यो भूतेभ्य स्त्वा विश्वेभ्यो विश्वेभ्य स्त्वा भूतेभ्यः ।

(81)[P40] 7.1.11.1(74)– त्वा । भूतेभ्यः ॥

त्वा भूतेभ्यो भूतेभ्य स्त्वा त्वा भूतेभ्यः ।

(82)[P40] 7.1.11.1(75)- भू॒तेभ्यः॑ ॥

भू॒तेभ्य॒ इति॑ भू॒तेभ्यः॑ ।

========

## 7.1.12 अनुवाकम् 12 – घनम्

(1)[P41] 7.1.12.1(1)– वि॒भूः । मा॒त्रा । प्र॒भूः ।

वि॒भूर् मा॒त्रा मा॒त्रा वि॒भूर् वि॒भूर् मा॒त्रा प्र॒भूः प्र॒भूर् मा॒त्रा वि॒भूर् वि॒भूर् मा॒त्रा प्र॒भूः ।

(2)[P41] 7.1.12.1(1)– वि॒भूः ।

वि॒भूरिति॑ वि – भूः ।

(3)[P41] 7.1.12.1(2)– मा॒त्रा । प्र॒भूः । पि॒त्रा ।

मा॒त्रा प्र॒भूः प्र॒भूर् मा॒त्रा मा॒त्रा प्र॒भूः पि॒त्रा पि॒त्रा प्र॒भूर् मा॒त्रा मा॒त्रा प्र॒भूः पि॒त्रा ।

(4)[P41] 7.1.12.1(3)– प्र॒भूः । पि॒त्रा । अश्वः॑ ।

प्र॒भूः पि॒त्रा पि॒त्रा प्र॒भूः प्र॒भूः पि॒त्रा ऽश्वो ऽश्वः॑ पि॒त्रा प्र॒भूः प्र॒भूः पि॒त्रा ऽश्वः॑ ।

(5)[P41] 7.1.12.1(3)– प्र॒भूः ।

प्र॒भूरिति॑ प्र – भूः ।

(6)[P41] 7.1.12.1(4)– पि॒त्रा । अश्वः॑ । अ॒सि॒ ।

पि॒त्रा ऽश्वो ऽश्वः॑ पि॒त्रा पि॒त्रा ऽश्वो᳚ ऽस्य॒स्य श्वः॑ पि॒त्रा पि॒त्रा ऽश्वो॑ ऽसि ।

(7)[P41] 7.1.12.1(5)– अश्वः॑ । अ॒सि॒ । हयः॑ । (GS–7.1–33)

अश्वो᳚ ऽस्य॒स्य श्वो ऽश्वो॑ ऽसि॒ हयो॒ हयो॒ ऽस्य श्वो ऽश्वो॑ ऽसि॒ हयः॑ ।

(8)[P41] 7.1.12.1(6)– अ॒सि॒ । हयः॑ । अ॒सि॒ । (GS–7.1–33)

अ॒सि॒ हयो॒ हयो᳚ ऽस्यसि॒ हयो᳚ ऽस्यसि॒ हयो᳚ ऽस्यसि॒ हयो॑ ऽसि ।

(9)[P41] 7.1.12.1(7)– हयः॑ । अ॒सि॒ । अत्यः॑ । (GS–7.1–33)

हयो᳚ ऽस्यसि॒ हयो॒ हयो॒ ऽस्यत्यो ऽत्यो॑ ऽसि॒ हयो॒ हयो॒ ऽस्यत्यः॑ ।

(10)[P41] 7.1.12.1(8)– अ॒सि॒ । अत्यः॑ । अ॒सि॒ । (GS–7.1–33)

अ॒स्यत्यो ऽत्यो᳚ ऽस्य॒ स्यत्यो᳚ ऽस्य॒ स्यत्यो᳚ ऽस्य॒ स्यत्यो॑ ऽसि ।

(11)[P41] 7.1.12.1(9)- अत्यः । असि । नरः । (GS-7.1-33)

अत्यो ऽस्य स्यत्यो ऽत्यो ऽसि नरो नरो ऽस्यत्यो ऽत्यो ऽसि नरः ।

(12)[P41] 7.1.12.1(10)- असि । नरः । असि । (GS-7.1-33)

असि नरो नरो ऽस्यसि नरो ऽस्यसि नरो ऽस्यसि नरो ऽसि ।

(13)[P41] 7.1.12.1(11)- नरः । असि । अर्वा । (GS-7.1-33)

नरो ऽस्यसि नरो नरो ऽस्यर्वा ऽर्वा ऽसि नरो नरो ऽस्यर्वा ।

(14)[P41] 7.1.12.1(12)- असि । अर्वा । असि । (GS-7.1-33)

अस्यर्वा ऽर्वा ऽस्य स्यर्वा ऽस्य स्यर्वा ऽस्य स्यर्वा ऽसि ।

(15)[P41] 7.1.12.1(13)- अर्वा । असि । सप्तिः ।

अर्वा ऽस्य स्यर्वा ऽर्वा ऽसि सप्तिः सप्ति रस्यर्वा ऽर्वा ऽसि सप्तिः ।

(16)[P41] 7.1.12.1(14)- असि । सप्तिः । असि ।

असि सप्तिः सप्ति रस्यसि सप्ति रस्यसि सप्ति रस्यसि सप्तिरसि ।

(17)[P41] 7.1.12.1(15)- सप्तिः । असि । वाजी ।

सप्ति रस्यसि सप्तिः सप्तिरसि वाजी वाज्यसि सप्तिः सप्ति रसि वाजी ।

(18)[P41] 7.1.12.1(16)- असि । वाजी । असि ।

असि वाजी वाज्य स्यसि वाज्य स्यसि वाज्य स्यसि वाज्यसि ।

(19)[P41] 7.1.12.1(17)- वाजी । असि । वृषा ।

वाज्य स्यसि वाजी वाज्यसि वृषा वृषा ऽसि वाजी वाज्यसि वृषा ।

(20)[P41] 7.1.12.1(18)- असि । वृषा । असि ।

असि वृषा वृषा ऽस्यसि वृषा ऽस्यसि वृषा ऽस्यसि वृषा ऽसि ।

(21)[P41] 7.1.12.1(19)- वृषा । असि । नृमणाः ।

वृषा ऽस्यसि वृषा वृषा ऽसि नृमणा नृमणा असि वृषा वृषा ऽसि नृमणाः ।

(22)[P41] 7.1.12.1(20)- असि । नृमणाः । असि ।

असि नृमणा नृमणा अस्यसि नृमणा अस्यसि नृमणा अस्यसि नृमणा असि ।

(23)[P41] 7.1.12.1(21)- नृमणाः । असि । ययुः ।

नृमणा अस्यसि नृमणा नृमणा असि ययुर् ययु रसि नृमणा नृमणा असि ययुः ।

(24)[P41] 7.1.12.1(21)- नृमणाः ।

नृमणा इति नृ – मनाः ।

(25)[P41] 7.1.12.1(22)- असि । ययुः । नाम ।

असि ययुर् ययु रस्यसि ययुर् नाम नाम ययु रस्यसि ययुर् नाम ।

(26)[P41] 7.1.12.1(23)- ययुः । नाम । असि ।

ययुर् नाम नाम ययुर् ययुर् नामा स्यसि नाम ययुर् ययुर् नामासि ।

(27)[P41] 7.1.12.1(24)- नाम । असि । आदित्यानाम् ।

नामा स्यसि नाम नामा स्यादित्याना मादित्याना मसि नाम नामा स्यादित्यानाम् ।

(28)[P41] 7.1.12.1(25)- असि । आदित्यानाम् । पत्व ।

अस्यादित्याना मादित्याना मस्य स्यादित्यानाम् पत्व पत्वा दित्याना मस्य स्यादित्यानाम् पत्व ।

(29)[P41] 7.1.12.1(26)- आदित्यानाम् । पत्व । अनु ।

आदित्यानाम् पत्व पत्वा दित्याना मादित्यानाम् पत्वान्वनु पत्वा दित्याना मादित्यानाम् पत्वानु ।

(30)[P41] 7.1.12.1(27)- पत्व । अनु । इहि । (GS-7.1-35)

पत्वान् वनु पत्व पत्वान् विहीह्यनु पत्व पत्वान् विहि ।

(31)[P41] 7.1.12.1(28)- अनु । इहि । अग्नये । (GS-7.1-35)

अन्विही ह्यन् वन्वि ह्यग्नये ऽग्नय इह्यन् वन् विह्यग्नये ।

(32)[P41] 7.1.12.1(29)- इहि । अग्नये । स्वाहा । (GS-7.1-35)

इह्य ग्नये ऽग्नय इही ह्यग्नये स्वाहा स्वाहा ऽग्नय इही ह्यग्नये स्वाहा ।

(33)[P41] 7.1.12.1(30)- अग्नये । स्वाहा । स्वाहा । (GS-7.1-35)

अग्नये स्वाहा स्वाहा ऽग्नये ऽग्नये स्वाहा ।

(34)[P41] 7.1.12.1(31)- स्वाहा । स्वाहा । (GS-7.1-35)

स्वाहा स्वाहा ।

(35)[P41] 7.1.12.1(32)- स्वाहा । इन्द्राग्निभ्याम् । स्वाहा । (GS-7.1-35)

स्वाहेन्द्राग्निभ्या मिन्द्राग्निभ्या(गग्) स्वाहा स्वाहेन्द्राग्निभ्या(गग्) स्वाहा स्वाहेन्द्राग्निभ्या(गग्) स्वाहा स्वाहेन्द्राग्निभ्या(गग्) स्वाहा ।

(36)[P41] 7.1.12.1(33)- इन्द्राग्निभ्याम् । स्वाहा । प्रजापतये ।

इन्द्राग्निभ्या(गग्) स्वाहा स्वाहेन्द्राग्निभ्या मिन्द्राग्निभ्या(गग्) स्वाहा प्रजापतये प्रजापतये स्वाहेन्द्राग्निभ्या मिन्द्राग्निभ्या(गग्) स्वाहा प्रजापतये ।

(37)[P41] 7.1.12.1(33)- इन्द्राग्निभ्याम् ।

इन्द्राग्निभ्यामितीन्द्राग्नि - भ्याम् ।

(38)[P41] 7.1.12.1(34)- स्वाहा । प्रजापतये । स्वाहा ।

स्वाहा प्रजापतये प्रजापतये स्वाहा स्वाहा प्रजापतये स्वाहा स्वाहा प्रजापतये स्वाहा स्वाहा प्रजापतये स्वाहा ।

(39)[P41] 7.1.12.1(35)- प्रजापतये । स्वाहा । विश्वेभ्यः ।

प्रजापतये स्वाहा स्वाहा प्रजापतये प्रजापतये स्वाहा विश्वेभ्यो विश्वेभ्यः स्वाहा प्रजापतये प्रजापतये स्वाहा विश्वेभ्यः ।

(40)[P41] 7.1.12.1(35)- प्रजापतये ।

प्रजापतय इति प्रजा - पतये ।

(41)[P41] 7.1.12.1(36)- स्वाहा । विश्वेभ्यः । देवेभ्यः ।

स्वाहा विश्वेभ्यो विश्वेभ्यः स्वाहा स्वाहा विश्वेभ्यो देवेभ्यो देवेभ्यो विश्वेभ्यः स्वाहा स्वाहा विश्वेभ्यो देवेभ्यः ।

(42)[P41] 7.1.12.1(37)- विश्वेभ्यः । देवेभ्यः । स्वाहा ।

विश्वेभ्यो देवेभ्यो देवेभ्यो विश्वेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा स्वाहा देवेभ्यो विश्वेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा ।

(43)[P41] 7.1.12.1(38)- देवेभ्यः । स्वाहा । सर्वाभ्यः ।

देवेभ्यः स्वाहा स्वाहा देवेभ्यो देवेभ्यः स्वाहा सर्वाभ्यः सर्वाभ्यः स्वाहा देवेभ्यो देवेभ्यः स्वाहा सर्वाभ्यः ।

(44)[P41] 7.1.12.1(39)- स्वाहा । सर्वाभ्यः । देवताभ्यः ।

स्वाहा सर्वाभ्यः सर्वाभ्यः स्वाहा स्वाहा सर्वाभ्यो देवताभ्यो देवताभ्यः सर्वाभ्यः स्वाहा स्वाहा सर्वाभ्यो देवताभ्यः ।

(45)[P41] 7.1.12.1(40)- सर्वाभ्यः । देवताभ्यः । इह ।

सर्वाभ्यो देवताभ्यो देवताभ्यः सर्वाभ्यः सर्वाभ्यो देवताभ्य इहेह देवताभ्यः सर्वाभ्यः सर्वाभ्यो देवताभ्य इह ।

(46)[P41] 7.1.12.1(41)- दे॒वेता᳚भ्यः । इ॒ह । धृति॑ः ।

दे॒वेता᳚भ्य इ॒हेह दे॒वेता᳚भ्यो दे॒वेता᳚भ्य इ॒ह धृति॒र् धृति॑ रि॒ह दे॒वेता᳚भ्यो दे॒वेता᳚भ्य इ॒ह धृति॑ः ।

(47)[P41] 7.1.12.1(42)- इ॒ह । धृति॑ः । स्वाहा᳚ ।

इ॒ह धृति॒र् धृति॑ रि॒हेह धृति॒ः स्वाहा॒ स्वाहा॒ धृति॑ रि॒हेह धृति॒ः स्वाहा᳚ ।

(48)[P41] 7.1.12.1(43)- धृति॑ः । स्वाहा᳚ । इ॒ह ।

धृति॒ः स्वाहा॒ स्वाहा॒ धृति॒र् धृति॒ः स्वा हे॒हेह स्वाहा॒ धृति॒र् धृति॒ः स्वाहे॒ह ।

(49)[P41] 7.1.12.1(44)- स्वाहा᳚ । इ॒ह । विधृ॑तिः ।

स्वा हे॒हेह स्वाहा॒ स्वाहे॒ह विधृ॑ति॒र् विधृ॑ति रि॒ह स्वाहा॒ स्वाहे॒ह विधृ॑तिः ।

(50)[P41] 7.1.12.1(45)- इ॒ह । विधृ॑तिः । स्वाहा᳚ ।

इ॒ह विधृ॑ति॒र् विधृ॑ति रि॒हेह विधृ॑ति॒ः स्वाहा॒ स्वाहा॒ विधृ॑ति रि॒हेह विधृ॑ति॒ः स्वाहा᳚ ।

(51)[P41] 7.1.12.1(46)- विधृ॑तिः । स्वाहा᳚ । इ॒ह ।

विधृ॑ति॒ः स्वाहा॒ स्वाहा॒ विधृ॑ति॒र् विधृ॑ति॒ः स्वा हे॒हेह स्वाहा॒ विधृ॑ति॒र् विधृ॑ति॒ः स्वाहे॒ह ।

(52)[P41] 7.1.12.1(46)- विधृ॑तिः ।

विधृ॑ति॒रिति॒ वि - धृ॒ति॒ः ।

(53)[P41] 7.1.12.1(47)- स्वाहा᳚ । इ॒ह । रन्ति॑ः ।

स्वा हे॒हेह स्वाहा॒ स्वाहे॒ह रन्ती॒ रन्ति॑ रि॒ह स्वाहा॒ स्वाहे॒ह रन्ति॑ः ।

(54)[P41] 7.1.12.1(48)- इ॒ह । रन्ति॑ः । स्वाहा᳚ ।

इ॒ह रन्ती॒ रन्ति॑ रि॒हेह रन्ति॒ः स्वाहा॒ स्वाहा॒ रन्ति॑ रि॒हेह रन्ति॒ः स्वाहा᳚ ।

(55)[P41] 7.1.12.1(49)- रन्ति॑ः । स्वाहा᳚ । इ॒ह । (GS-7.1-34)

रन्ति॒ः स्वाहा॒ स्वाहा॒ रन्ती॒ रन्ति॒ः स्वा हे॒हेह स्वाहा॒ रन्ती॒ रन्ति॒ः स्वाहे॒ह ।

(56)[P41] 7.1.12.1(50)- स्वाहा । इह । रमतिः । (GS-7.1-34)

स्वा हेहेह स्वाहा स्वाहेह रमती रमतिरिह स्वाहा स्वाहेह रमतिः ।

(57)[P41] 7.1.12.1(51)- इह । रमतिः । स्वाहा । (GS-7.1-34)

इह रमती रमति रिहेह रमतिः स्वाहा स्वाहा रमति रिहेह रमतिः स्वाहा ।

(58)[P41] 7.1.12.1(52)- रमतिः । स्वाहा । भूः । (GS-7.1-34)

रमतिः स्वाहा स्वाहा रमती रमतिः स्वाहा भूर् भूः स्वाहा रमती रमतिः स्वाहा भूः ।

(59)[P41] 7.1.12.1(53)- स्वाहा । भूः । असि ।

स्वाहा भूर् भूः स्वाहा स्वाहा भूरस्यसि भूः स्वाहा स्वाहा भूरसि ।

(60)[P41] 7.1.12.1(54)- भूः । असि । भुवे ।

भूरस्यसि भूर् भूरसि भुवे भुवे ऽसि भूर् भूरसि भुवे ।

(61)[P41] 7.1.12.1(55)- असि । भुवे । त्वा ।

असि भुवे भुवे ऽस्यसि भुवे त्वा त्वा भुवे ऽस्यसि भुवे त्वा ।

(62)[P41] 7.1.12.1(56)- भुवे । त्वा । भव्याय ।

भुवे त्वा त्वा भुवे भुवे त्वा भव्याय भव्याय त्वा भुवे भुवे त्वा भव्याय ।

(63)[P41] 7.1.12.1(57)- त्वा । भव्याय । त्वा ।

त्वा भव्याय भव्याय त्वा त्वा भव्याय त्वा त्वा भव्याय त्वा त्वा भव्याय त्वा ।

(64)[P41] 7.1.12.1(58)- भव्याय । त्वा । भविष्यते ।

भव्याय त्वा त्वा भव्याय भव्याय त्वा भविष्यते भविष्यते त्वा भव्याय भव्याय त्वा भविष्यते ।

(65)[P41] 7.1.12.1(59)- त्वा । भविष्यते । त्वा ।

त्वा भविष्यते भविष्यते त्वा त्वा भविष्यते त्वा त्वा भविष्यते त्वा त्वा भविष्यते त्वा ।

(66)[P41] 7.1.12.1(60)- भविष्यते । त्वा । विश्वेभ्यः ।

भविष्यते त्वा त्वा भविष्यते भविष्यते त्वा विश्वेभ्यो विश्वेभ्य स्त्वा भविष्यते भविष्यते त्वा विश्वेभ्यः ।

(67)[P41] 7.1.12.1(61)- त्वा । विश्वेभ्यः । त्वा ।

त्वा विश्वेभ्यो विश्वेभ्य स्त्वा त्वा विश्वेभ्य स्त्वा त्वा विश्वेभ्य स्त्वा त्वा विश्वेभ्य स्त्वा ।

(68)[P41] 7.1.12.1(62)- विश्वेभ्यः । त्वा । भूतेभ्यः ।

विश्वेभ्य स्त्वा त्वा विश्वेभ्यो विश्वेभ्य स्त्वा भूतेभ्यो भूतेभ्य स्त्वा विश्वेभ्यो विश्वेभ्य स्त्वा भूतेभ्यः ।

(69)[P41] 7.1.12.1(63)- त्वा । भूतेभ्यः । देवाः ।

त्वा भूतेभ्यो भूतेभ्य स्त्वा त्वा भूतेभ्यो देवा देवा भूतेभ्य स्त्वा त्वा भूतेभ्यो देवाः ।

(70)[P41] 7.1.12.1(64)- भूतेभ्यः । देवाः । आशापालाः ।

भूतेभ्यो देवा देवा भूतेभ्यो भूतेभ्यो देवा आशापाला आशापाला देवा भूतेभ्यो भूतेभ्यो देवा आशापालाः ।

(71)[P41] 7.1.12.1(65)- देवाः । आशापालाः । एतम् ।

देवा आशापाला आशापाला देवा देवा आशापाला एत मेत माशापाला देवा देवा आशापाला एतम् ।

(72)[P41] 7.1.12.1(66)- आशापालाः । एतम् । देवेभ्यः ।

आशापाला एत मेत माशापाला आशापाला एतम् देवेभ्यो देवेभ्य एत माशापाला आशापाला एतम् देवेभ्यः ।

(73)[P41] 7.1.12.1(66)- आशापालाः ।

आशापाला इत्याशा - पालाः ।

(74)[P41] 7.1.12.1(67)- एतम् । देवेभ्यः । अश्वम् ।

एतम् देवेभ्यो देवेभ्य एत मेतम् देवेभ्यो ऽश्व मश्वम् देवेभ्य एत मेतम् देवेभ्यो ऽश्वम् ।

(75)[P41] 7.1.12.1(68)- देवेभ्यः । अश्वम् । मेधाय ।

देवेभ्यो ऽश्व मश्वम् देवेभ्यो देवेभ्यो ऽश्वम् मेधाय मेधाया श्वम् देवेभ्यो देवेभ्यो ऽश्वम् मेधाय ।

(76)[P41] 7.1.12.1(69)- अश्वम् । मेधाय । प्रोक्षितम् ।

अश्वम् मेधाय मेधाया श्व मश्वम् मेधाय प्रोक्षितम् प्रोक्षितम् मेधाया श्व मश्वम् मेधाय प्रोक्षितम् ।

(77)[P41] 7.1.12.1(70)- मेधाय । प्रोक्षितम् । गोपायत ॥

मेधाय प्रोक्षितम् प्रोक्षितम् मेधाय मेधाय प्रोक्षितम् गोपायत गोपायत प्रोक्षितम् मेधाय मेधाय प्रोक्षितम् गोपायत ।

(78)[P41] 7.1.12.1(71)- प्रोक्षितम् । गोपायत ॥

प्रोक्षितम् गोपायत गोपायत प्रोक्षितम् प्रोक्षितम् गोपायत ।

(79)[P41] 7.1.12.1(71)- प्रोक्षितम् ।

प्रोक्षितमिति प्र - उक्षितम् ।

(80)[P41] 7.1.12.1(72)- गोपायत ॥

गोपायतेति गोपायत ।

========

## 7.1.13 अनुवाकम् 13 – घनम्

(1)[P42] 7.1.13.1(1)- आयनाय । स्वाहा । प्रायणाय ।

आयनाय स्वाहा स्वाहा ऽऽयनाया यनाय स्वाहा प्रायणाय प्रायणाय स्वाहा ऽऽयनाया यनाय स्वाहा प्रायणाय ।

(2)[P42] 7.1.13.1(1)- आयनाय ।

आयनायेत्या – अयनाय ।

(3)[P42] 7.1.13.1(2)- स्वाहा । प्रायणाय । स्वाहा ।

स्वाहा प्रायणाय प्रायणाय स्वाहा स्वाहा प्रायणाय स्वाहा स्वाहा प्रायणाय स्वाहा स्वाहा प्रायणाय स्वाहा ।

(4)[P42] 7.1.13.1(3)- प्रायणाय । स्वाहा । उद्द्रावाय ।

प्रायणाय स्वाहा स्वाहा प्रायणाय प्रायणाय स्वाहोद्द्रावा योद्द्रावाय स्वाहा प्रायणाय प्रायणाय स्वाहोद्द्रावाय ।

(5)[P42] 7.1.13.1(3)- प्रायणाय ।

प्रायणायेति प्र – अयनाय ।

(6)[P42] 7.1.13.1(4)- स्वाहा । उद्द्रावाय । स्वाहा ।

स्वाहोद्द्रावा योद्द्रावाय स्वाहा स्वाहोद्द्रावाय स्वाहा स्वाहोद्द्रावाय स्वाहा स्वाहोद्द्रावाय स्वाहा ।

(7)[P42] 7.1.13.1(5)- उद्द्रावाय । स्वाहा । उद्द्रुताय ।

उद्द्रावाय स्वाहा स्वाहोद्द्रावा योद्द्रावाय स्वाहोद्द्रुता योद्द्रुताय स्वाहोद्द्रावा योद्द्रावाय स्वाहोद्द्रुताय ।

(8)[P42] 7.1.13.1(5)- उद्द्रावाय ।

उद्द्रावायेत्युत् - द्रावाय ।

(9)[P42] 7.1.13.1(6)- स्वाहा । उद्दुताय । स्वाहा ।

स्वाहोद्दुता योद्दुताय स्वाहा स्वाहोद्दुताय स्वाहा स्वाहोद्दुताय स्वाहा स्वाहोद्दुताय स्वाहा ।

(10)[P42] 7.1.13.1(7)- उद्दुताय । स्वाहा । शूकाराय ।

उद्दुताय स्वाहा स्वाहोद्दुता योद्दुताय स्वाहा शूकाराय शूकाराय स्वाहोद्दुता योद्दुताय स्वाहा शूकाराय ।

(11)[P42] 7.1.13.1(7)- उद्दुताय ।

उद्दुतायेत्युत् - दुताय ।

(12)[P42] 7.1.13.1(8)- स्वाहा । शूकाराय । स्वाहा ।

स्वाहा शूकाराय शूकाराय स्वाहा स्वाहा शूकाराय स्वाहा स्वाहा शूकाराय स्वाहा स्वाहा शूकाराय स्वाहा ।

(13)[P42] 7.1.13.1(9)- शूकाराय । स्वाहा । शूकृताय ।

शूकाराय स्वाहा स्वाहा शूकाराय शूकाराय स्वाहा शूकृताय शूकृताय स्वाहा शूकाराय शूकाराय स्वाहा शूकृताय ।

(14)[P42] 7.1.13.1(9)- शूकाराय ।

शूकारायेति शू - काराय ।

(15)[P42] 7.1.13.1(10)- स्वाहा । शूकृताय । स्वाहा ।

स्वाहा शूकृताय शूकृताय स्वाहा स्वाहा शूकृताय स्वाहा स्वाहा शूकृताय स्वाहा स्वाहा शूकृताय स्वाहा ।

(16)[P42] 7.1.13.1(11)- शूकृ॑ताय । स्वाहा᳚ । पला॑यिताय ।

शूकृ॑ताय॒ स्वाहा॒ स्वाहा॒ शूकृ॑ताय॒ शूकृ॑ताय॒ स्वाहा॒ पला॑यिताय॒ पला॑यिताय॒ स्वाहा॒ शूकृ॑ताय॒ शूकृ॑ताय॒ स्वाहा॒ पला॑यिताय ।

(17)[P42] 7.1.13.1(11)- शूकृ॑ताय ।

शूकृ॑ता॒येति॒ शू – कृ॒ता॒य॒ ।

(18)[P42] 7.1.13.1(12)- स्वाहा᳚ । पला॑यिताय । स्वाहा᳚ ।

स्वाहा॒ पला॑यिताय॒ पला॑यिताय॒ स्वाहा॒ स्वाहा॒ पला॑यिताय॒ स्वाहा॒ स्वाहा॒ पला॑यिताय॒ स्वाहा॒ स्वाहा॒ पला॑यिताय॒ स्वाहा᳚ ।

(19)[P42] 7.1.13.1(13)- पला॑यिताय । स्वाहा᳚ । आ॒पला॑यिताय ।

पला॑यिताय॒ स्वाहा॒ स्वाहा॒ पला॑यिताय॒ पला॑यिताय॒ स्वाहा॒ ऽऽपला॑यिताया॒ पला॑यिताय॒ स्वाहा॒ पला॑यिताय॒ पला॑यिताय॒ स्वाहा॒ ऽऽपला॑यिताय ।

(20)[P42] 7.1.13.1(14)- स्वाहा᳚ । आ॒पला॑यिताय । स्वाहा᳚ ।

स्वाहा॒ ऽऽपला॑यिताया॒ पला॑यिताय॒ स्वाहा॒ स्वाहा॒ ऽऽपला॑यिताय॒ स्वाहा॒ स्वाहा॒ ऽऽपला॑यिताय॒ स्वाहा॒ स्वाहा॒ ऽऽपला॑यिताय॒ स्वाहा᳚ ।

(21)[P42] 7.1.13.1(15)- आ॒पला॑यिताय । स्वाहा᳚ । आ॒वल्ग॑ते ।

आ॒पला॑यिताय॒ स्वाहा॒ स्वाहा॒ ऽऽपला॑यिताया॒ पला॑यिताय॒ स्वाहा॒ ऽऽवल्ग॑त आ॒वल्ग॑ते॒ स्वाहा॒ ऽऽपला॑यिताया॒ पला॑यिताय॒ स्वाहा॒ ऽऽवल्ग॑ते ।

(22)[P42] 7.1.13.1(15)- आ॒पला॑यिताय ।

आ॒पला॑यिता॒येत्या᳚ – पला॑यिताय ।

(23)[P42] 7.1.13.1(16)- स्वाहा । आवल्गते । स्वाहा ।

स्वाहा ऽऽवल्गत आवल्गते स्वाहा स्वाहा ऽऽवल्गते स्वाहा स्वाहा ऽऽवल्गते स्वाहा स्वाहा ऽऽवल्गते स्वाहा ।

(24)[P42] 7.1.13.1(17)- आवल्गते । स्वाहा । परावल्गते ।

आवल्गते स्वाहा स्वाहा ऽऽवल्गत आवल्गते स्वाहा परावल्गते परावल्गते स्वाहा ऽऽवल्गत आवल्गते स्वाहा परावल्गते ।

(25)[P42] 7.1.13.1(17)- आवल्गते ।

आवल्गत इत्या - वल्गते ।

(26)[P42] 7.1.13.1(18)- स्वाहा । परावल्गते । स्वाहा ।

स्वाहा परावल्गते परावल्गते स्वाहा स्वाहा परावल्गते स्वाहा स्वाहा परावल्गते स्वाहा स्वाहा परावल्गते स्वाहा ।

(27)[P42] 7.1.13.1(19)- परावल्गते । स्वाहा । आयते ।

परावल्गते स्वाहा स्वाहा परावल्गते परावल्गते स्वाहा ऽऽयत आयते स्वाहा परावल्गते परावल्गते स्वाहा ऽऽयते ।

(28)[P42] 7.1.13.1(19)- परावल्गते ।

परावल्गत इति परा - वल्गते ।

(29)[P42] 7.1.13.1(20)- स्वाहा । आयते । स्वाहा ।

स्वाहा ऽऽयत आयते स्वाहा स्वाहा ऽऽयते स्वाहा स्वाहा ऽऽयते स्वाहा स्वाहा ऽऽयते स्वाहा ।

(30)[P42] 7.1.13.1(21)- आयते । स्वाहा । प्रयते ।

आयते स्वाहा स्वाहा ऽऽयत आयते स्वाहा प्रयते प्रयते स्वाहा ऽऽयत आयते स्वाहा प्रयते ।

(31)[P42] 7.1.13.1(21)- आ॒य॒ते ।

आ॒य॒त इत्या॒ - य॒ते ।

(32)[P42] 7.1.13.1(22)- स्वाहा॒ । प्र॒य॒ते । स्वाहा॒ ।

